दशमूल, त्रिफला, हल्दी, दारुहल्दी, कुड़ेकी छाल, सातवन, लटजीरा, नील, कुटकी, अमलतासका गूदा, अञ्जीरकी जड़, पोहकरमूल, यवासा प्रत्येक ८ तोला, एक द्रोण जलमें मिलाकर पकाना चाहिये। चतुर्थांश शेष रहनेपर उतार छानकर क्वाथमें घी १ प्रस्थ, भारङ्गी, पाढ़, त्रिकटु, निसोथ, जलवेतस अथवा समुद्र फल, गजपीपल, अरहर, मूर्वा दन्ती, चिरायता, चीतकी जड़, सारिवा, काली सारिवा, रोहिष घास, अजवायन तथा नेवारी प्रत्येक १ तोला पीस कल्क कर छोड़ना चाहिये । तथा गायके गोबरका रस, खट्टा दही, दूध, गोमूत्र घीके समान छोड़कर पकाना चाहिये । यह "बृहत्पञ्चगव्य घृत" अपस्मार, ज्वर, कास, सूजन उदररोग, गुल्म, अर्श, पाण्डुरोग, कामला, हलीमक, कुरूपता, ग्रहदोष, राक्षस दोष, तथा चातुर्थिक ज्वरको नष्ट करता है ॥ १७-२२ ॥

महाचैतसं घृतम्

शणत्रिवृत्तथैरण्डो दशमूली शतावरी ॥ २३ ॥

रास्ना मागधिका शिग्रुः क्वाथ्यं द्विपलिकं भवेत् ।
विदारी मधुकं मेदे द्वे काकोल्यौ सिता तथा ॥२४
एभिः खर्जूरमृद्वीकाभीरुमुञ्जातगोक्षुरैः ।
चैतसस्य घृतस्यांगैः पक्त्व्यं सर्पिरुत्तमम् ॥ २५ ॥
महाचैतससंज्ञं तु सर्वापस्मारनाशनम् ।
गरोन्मादप्रतिश्यायतृतीयकचतुर्थकान् ॥ २६ ॥
पापालक्ष्म्यौ जयेदेतत्सर्वग्रहनिवारणम् ।
कासश्वासहरं चैव शुक्रार्तवविशोधनम् ॥ २७ ॥
घृतमानं क्वाथविधिरिह चैवसवन्मतम् ।
कल्कश्चैतसकल्कोक्तद्रव्यैः सार्धं च पादिकः॥२८॥
नित्यं मुञ्जातकाप्राप्तौ तालमस्तकमिष्यते ।

सन, निसोथ, एरण्डकी, छाल, दशमूल, शतावर, रासन, छोटी पीपल, सहिंजन यह प्रत्येक ८ तोला ले १ द्रोण जलमें पकाना चाहिये । चतुर्थांश रहनेपर उतार छानकर विदारीकन्द, मौरेठी, मेदा, महामेदा, काकोली, क्षीरकाकोली, मिश्री, छुहारा, मुनक्का, शतावर, गोखरू, मुञ्जात, तथा कल्याणकघृतका कल्क घृतसे चतुर्थांश मिलाकर घृत पकाना चाहिये । यह "महाचैतसघृत" समस्त अपस्मार, कृत्रिम विष, उन्माद, जुखाम, तृतीयक चातुर्थिक ज्वर, पाप, कुरूपता, ग्रह दोष, कास, तथा श्वासको नष्ट करता और रजवीर्यको शुद्ध करता है । घीका मान तथा क्वाथ चैतसके समान समझना चाहिये । कल्क कुल मिलाकर घृतसे चतुर्थांश ही हो । मुञ्जातकके अभावमें ताड़का मस्तक लेना चाहिये ॥ २३-२८ ॥

कूष्माण्डघृतम्

कूष्माण्डकरसे सर्पिरष्टादशगुणे पचेत् ॥ २९ ॥
यष्ट्याह्वकल्कं तत्पानमपस्मारविनाशनम् ।

घीसे चतुर्थांश मौरेठीका कल्क तथा अठारह गुणा कुम्हड़ेका रस मिलाकर सिद्ध किया गया घृत अपस्मारको नष्ट करता है ॥ २९ ॥

ब्राह्मीघृतम्

ब्राह्मीरसे वचाकुष्ठशंखपुष्पीभिरेव च ॥ ३० ॥
पुराणं मेध्यमुन्मादग्रहापस्मारनुद् घृतम् ।

ब्राह्मीके रसमें पुराना घी, वच, कूठ, व शंखपुष्पीका कल्क छोड़कर पकानेसे उन्माद ग्रहदोष, अपस्मारको नष्ट करता तथा मेधाको बढ़ाता है ॥ ३० ॥

पलंकषाद्यं तैलम्

पलंकषावचापथ्यावृश्चिकार्यर्कसर्षपैः ॥ ३१ ॥
जटिलापूतनाकेशीलाङ्गलीहिंगुचोरकैः ।
लशुनातिविषाचित्राकुष्ठैर्विड्भिश्च पक्षिणाम् ॥३२
मांसाशिनां यथालाभं बस्तमूत्रे चतुर्गुणे ।
सिद्धमभ्यञ्जने तैलमपस्मारविनाशनम् ॥ ३३ ॥

गुग्गुल, बच, हर्र, बिछुआ, आक, सरसों, जटामांसी, करियारी, जटामांसी, छोटी हर्र, हींग, मटेउर, लहसुन, अतीस, दन्ती, कूठ तथा मांस खानेवाले पक्षियोंकी विष्ठाका कल्क तथा चतुर्गुण गोमूत्र मिलाकर सिद्ध किया गया घृत मालिश करनेसे अपस्मारको नष्ट करता है ॥ ३१-३३ ॥

अभ्यङ्गः

अभ्यङ्गः सार्षपं तैलं बस्तमूत्रे चतुर्गुणे ।
सिद्धं स्याद्गोशकृन्मूत्रैः पानोत्सादनमेव च ॥३४॥

चतुर्गुण बकरेके मूत्रमें मिलाकर सिद्ध किया गया सरसोंका तैल मालिश करने तथा गायके गोबरके रसका गोमूत्रके साथ पीना तथा उबटन लगाना हितकर है ॥ ३४ ॥

इत्यपस्माराधिकारः समाप्तः ।

अथ वातव्याध्यधिकारः

तत्र सामान्यतश्चिकित्सा

स्वाद्वम्ललवणैः स्निग्धैराहारैर्वातरोगिणः ।
अभ्यङ्गस्नेहबस्त्याद्यैः सर्वानेवोपपादयेत् ॥ १ ॥

समस्त वातरोगियोंको मीठे खट्टे नमकीन तथा स्नेहयुक्त भोजन तथा मालिश व स्नेहयुक्त वस्ति आदि देना हितकर है ॥ १ ॥

भिन्नभिन्नस्थानस्थवातचिकित्सा

विशेषतस्तु कोष्ठस्थे वाते क्षारं पिबेन्नरः ।
आमाशयस्थे शुद्धस्य यथा दोषहरी क्रिया ॥ २ ॥
आमाशयगते वाते छर्दिताय यथाक्रमम् ।
देयःषड्धरणो योगः सप्तरात्रं सुखाम्बुना ॥ ३ ॥

यदि वायु कोष्ठगत हो, तो क्षार पिलाना चाहिये । यदि आमाशयमें हो,तो शोधन कर वात नाशक क्रिया करनी चाहिये अर्थात् आमाशयगत वायुमें प्रथम स्नेहन स्वेदन कराकर वमन कराना चाहिये । फिर षड्धरण योग ७ दिनतक गरम जलसे देना चाहिये ॥ २ ॥ ३ ॥

षड्धरणयोगः

चित्रकेन्द्रयवाः पाठाकटुकातिविषाभयाः ।
महाव्याधिप्रशमनो योगः षड्धरणः स्मृतः ॥ ४ ॥

पलदशमांशो धरणं योगोऽयं सौश्रुतस्तस्य ।
माषेण पंचगुञ्जकमानेन प्रत्यहं देयः ॥ ५ ॥

चीतकी जड़, इन्द्रयव, पाढ़, कुटकी, अतीस, बड़ी हर्रका छिलका यह वातव्याधिको नष्ट करनेवाला 'धरण' योग कहा जाता है । यह योग सुश्रुतका है, अतः उन्हींके मान (५ रत्तीके माशा) से पलके दशमांश (३२ रत्ती) एक खुराक बनाना चाहिये ॥ ४ ॥ ५ ॥

पक्वाशयगतवातचिकित्सा ।

पक्वाशयगते वाते हितं स्नेहविरेचनम् ।
बस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः ॥ ६ ॥

पक्वाशयगत वातमें स्नेहयुक्त विरेचन, शोधनीय वस्ति तथा नमकीन चटनी हितकर है ॥ ६ ॥

स्नेहलवणम्

स्नुहीलवणवार्ताकुस्नेहांश्छन्ने घटे दहेत् ।
गोमयैः स्नेहलवणं तत्परं वातनाशनम् ॥ ७ ॥

थूहर, बैंगन, नमक, तिलतैल समान भाग ले एक भंडियामें बन्दकर वनकण्डोंकी आंचमें पकाना चाहिये । यह वात नष्ट करनेमें उत्तम 'स्नेहलवण' है ॥ ७ ॥

विभिन्नस्थानस्थवातचिकित्सा

कार्यो बस्तिगते चापि विधिर्वस्तिविशोधनः ।
त्वङ्मांसासृक्शिराप्राप्ते कुर्याच्चासृग्विमोक्षणम् ८॥

स्नेहोपनाहाग्निकर्मबन्धनोन्मर्दनानि च ।
स्नायुसन्ध्यस्थिसम्प्राप्ते कुर्याद्वाते विचक्षणः ॥९॥

स्वेदाभ्यङ्गावगाहांश्च हृद्यं चान्नं त्वगाश्रिते ।
शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ॥१०॥

विरेको मांसमेदःस्थे निरूहाः शमनानि च ।
बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत् ॥ ११ ॥

हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम् ।
विबद्धमार्गं शुक्रं तु दृष्ट्वा दद्याद्विरेचनम् ॥ १२ ॥

वस्तिगत वायुमें बस्तिशोधक विधि और त्वचा, मांसरक्त तथा शिराओंमें प्राप्त वायुमें रक्तमोक्षण करना चाहिये । तथा यदि वायु स्नायु सन्धि व अस्थिमें प्राप्त हो, तो स्नेहन उपनाहन, अग्निकर्म, बन्धन, व मर्दन कहने चाहिये । त्वग्गत-वायुमें स्वेद, अभ्यंग, अवगाह तथा हृदयके लिये हितकर अन्न सेवन करना चाहिये । रक्तगत वायुमें शीतल लेप विरेचन तथा रक्तमोक्षण हितकर है । तथा मांसमेदः स्थित वायुमें निरूहणबस्ति तथा शमनप्रयोग और अस्थि व मज्जागत वायुमें बाह्य व अभ्यन्तर स्नेहका प्रयोग करना चाहिये । शुक्रगत-वायुमें प्रसन्नता तथा बलशुक्रकारक अन्न पान हितकर हैं, पर यदि शुक्रका मार्ग मन्द हो तो शुक्र विरेचन औषध देना चाहिये ॥ ८-१२ ॥

शुष्कगर्भचिकित्सा

गर्भे शुष्के तु वातेन बालानां चापि शुष्यताम् ।
सितामधुककाश्मर्यैर्हितमुत्थापने पयः ॥ १३ ॥

गर्भके सूखने तथा बालकोंके शोष रोगमें मिश्री, मौरेठी तथा खम्भारके चूर्णके साथ दूध पीना हितकर है ॥ १३ ॥

शिरोगतवातचिकित्सा

शिरोगतेऽनिले वातशिरोरोगहरी क्रिया ।

शिरोगत वायुमें वातशिरोरोगनाशक चिकित्सा करनी चाहिये ।

हनुस्तम्भचिकित्सा

व्यादितास्ये हनुं स्विन्नामंगुष्ठाभ्यां प्रपीडय च॥१४
प्रदेशिनीभ्यां चोन्नस्य चिबुकोन्नामनं हितम् ।

जिसका मुख खुला ही रह गया हो, उसकी ठोढ़ीको स्वेदित कर अंगूठोंसे दबाकर उसी समय दोनों तर्जनियोंसे ठोढ़ीको ऊपरकी ओर उठावे ॥ १४ ॥–

अर्दितचिकित्सा

अर्दिते नवनीतेन खादेन्माषेण्डरीं नरः ॥ १५ ॥
क्षीरमांसरसैर्भुक्त्वा दशमूलीरसं पिबेत् ।
स्नेहाभ्यङ्गशिरोबस्तिपाननस्यपरायणः ॥ १६ ॥
अर्दितं स जयेत्सर्पिः पिबेदौत्तरभक्तकम् ।

अर्दितरोगमें मक्खनके साथ उड़दके बड़े खाने चाहियें,तथा दूध व मांसरसके साथ भोजन कर दशमूलका क्वाथ पीना चाहिये । तथा जो मनुष्य स्नेहाभ्यङ्ग शिरोबस्ति, स्नेपान तथा स्नेहयुक्त नस्य लेता है तथा घीके साथ भोजन करता है, उसका अर्दितरोग नष्ट होता है ॥ १५ ॥ १६ ॥

मन्यास्तम्भचिकित्सा

पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा ॥ १७ ॥
रूक्षःस्वेदस्तथा नस्यं मन्यास्तम्भे प्रशस्यते ।

पञ्चमूलका काढ़ा अथवा दशमूलका काढ़ा तथा रूक्ष स्वेद व रूक्ष नस्य मन्यास्तम्भको दूर करता है ॥ १७ ॥

जिह्वास्तम्भचिकित्सा

वाताद्वाग्धमनीदुष्टौ स्नेहगण्डूषधारणम् ॥ १८ ॥

वायुसे वाग्वाहिनी शिराओंके दूषित होनेपर स्नेहका गण्डूषधारण करना चाहिये ॥ १८ ॥

कल्याणको लेहः

सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम् ।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम् ॥१९॥
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ।
तच्चूर्णं सर्पिषालोड्य प्रत्यहं भक्षयेन्नरः ॥ २० ॥
एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः ।
मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिःस्वनः ॥ २१ ॥
जडगद्गदमूकत्वं लेहः कल्याणको जयेत् ।

हरिद्रा, वच, कूठ, छोटी पीपल, सोंठ, जीरा, अजवाइन, मौरेठी, सेंधानमक सबका महीन चूर्णकर घीके साथ प्रतिदिन) चाटना चाहिये । इक्कीस रात्रितक इसके प्रयोग करनेसे मनुष्य श्रुतिधर (एकवार सुनकर सदा याद रखनेवाला),मेघ तथा दुंदुभीके समान गरजनेवाला तथा मत्त कोकिलके समान स्वरवाला होता हैं । जड़ता, गद्गदकण्ठ तथा मूकताको यह "कल्याणक" लेह नष्ट करता है ॥ १९-२१ ॥

त्रिकस्कन्धादिगतवायुचिकित्सा

रूक्ष त्रिकस्कन्धगतं वायुं मन्यागतं तथा ।
वमनं हन्ति नस्यं च कुशलेन प्रयोजितम् ॥ २२ ॥

त्रिक, स्कन्ध तथा मन्यागतवायुको कुशल पुरुषद्वारा प्रयुक्त रूक्ष वमन तथा नस्य शान्त करता है ॥ २२ ॥

माषबलादिक्काथनस्यम्

माषबलाशूकशिम्बीकत्तृणरास्नाश्वगन्धोरुबूकाणाम् ।
क्काथो नस्यनिपीतो रामठलवणान्वितःकोष्णः॥२३॥
अपहरति पक्षवातं मन्यास्तंभं सकर्णनादरुजम् ।
दुर्जयमर्दितवातं सप्ताहाज्जयति चावश्यम् ॥२४॥

उड़द, खरेटी, कौंचके बीज, रोहिष घास, रासन, असगन्ध तथा एरण्डकी छालका क्काथ, भूनी हींग व नमक मिलाकर कुछ गरम गरम नासिका द्वारा पीनेसे (नस्य-लेनेसे (अवश्यमेव पक्षाघात, मन्यास्तम्भ, कानका दर्द तथा सनसनाहट व कठिन अर्दितरोग ७ दिनमें नष्ट होजाता है ॥ २३ ॥ २४ ॥

विश्वाचीचिकित्सा

दशमूलीबलामाषक्काथं तैलाज्यमिश्रितम् ।
सायं भुक्त्वा पिबेन्नक्तं विश्वाच्यामपबाहुके ॥२५॥
रसं बलायास्त्वथ पारिभद्रा-
स्तथात्मगुप्तास्वरसं पिबेद्वा ।
नस्यं तु यो मांसरसेन दद्या-
न्मासादसौ वज्रसमानबाहुः ॥ २६ ॥

(१) दशमूल, खरेटी, उड़दका क्काथ, तैल व घी मिलाकर सायकाल भोजन करनेके अनन्तर पीनेसे विश्वाची तथा अपबाहुक रोग नष्ट होता है । तथा (२) खरेटीका रस व (३) नीमका रस (४) अथवा कौंचका रस जो पीता है तथा (५) मांसरससे नस्य लेता है, उसके विश्वाची व अपबाहुक रोग नष्ट होते हैं ॥ २५ ॥ २६ ॥

पक्षाघातचिकित्सा

माषात्मगुप्तकैरण्डवाट्यालकशृतं पिबेत् ।
हिंगुलसैन्धवसंयुक्तं पक्षाघातनिवारणम् ॥ २७ ॥
बाहुशोषे पिबेत्सर्पिर्भुक्त्वा कल्याणकं महत् ।
हृदि प्रकुपिते वाते चांशुमत्याः पयो हितम् ॥२८॥
उड़द, कौंचके बीज, एरण्डकी छाल तथा खरेटीका क्काथ भुनी हींग व सेंधानमक मिलाकर पीनेसे पक्षाघातरोग नष्ट होता है । बाहुशोषमें भोजनके अनन्तर महाकल्याणकघृतका सेवन करना चाहिये । तथा हृदयमें वायुके कुपित होनेपर अपतन्त्रकवातमें) शालिपर्णीसे सिद्ध किया दूध पीना-चाहिये ॥ २७ ॥ २८ ॥

हरीतक्यादिचूर्णम्

हरीतकी वचा रास्ना सैन्धवं चाम्लवेतसम् ।
घृतमात्रासमायुक्तमपतन्त्रकनाशनम् ॥ २९ ॥
बड़ी हर्रका छिल्का, वच, रासन, सेंधा नमक तथा अम्ल-वेतका चूर्ण घीमें मिलाकर चाटनेसे अपतन्त्रक रोग नष्ट होता है ॥ २९ ॥

स्वल्परसोनपिण्डः

पलधर्मं पलं चैव रसोनस्य सुकुट्टितम् ।
हिंगुजीरकसिन्धूत्थैः सौवर्चलकटुत्रयैः ॥ ३० ॥
चूर्णितैर्माषकोन्मानैरवचूर्ण्य विलोडितम् ।
यथाग्नि भक्षितं प्रातः रुबूकक्काथानुपानतः ॥ ३१ ॥
दिने दिने प्रयोक्तव्यं मासमेकं निरन्तरम् ।
वातरोगं निहन्त्याशु अर्दितं सापतन्त्रकम् ॥ ३२ ॥
एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे ।
ऊरुस्तम्भे च गृध्रस्यां क्रिमिकोष्ठे विशेषतः ॥३३॥
कटीपृष्ठामयं हन्यादुदरं च विशेषतः ।
साफ कुटा हुआ लहसुन ६ तोला, भुनी हींग, जीरा, सेंधानमक, काला नमक, सोंठ, मिर्च, पीपल प्रत्येक १ माशे चूर्णकर अपनी अग्नि तथा बलके अनुसार सेवन करने तथा ऊपरसे एरण्डकी छालका क्काथ पीनेसे १ मासमें वातरोग, अर्दित, अपतन्त्रक, पक्षाघात, सर्वाङ्गग्रह, ऊरुस्तम्भ, गृध्रसी, क्रिमिकोष्ठ, कमर, पीठके रोग तना उदर रोगोंको नष्ट करता है ॥ ३०-३३ ॥

विविधा योगाः

हन्ति प्राग्भोजनात्पीतं दध्यम्लं सवचोषणम् ॥३४॥
अपतानकमन्योऽपि वातव्याधिक्रमो हितः ।

वातघ्नैर्दशमूल्या च नरं कुब्जमुपाचरेत् ॥ ३५ ॥
स्नेहैर्मांसरसैर्वापि प्रवृद्धं तं विवर्जयेत् ।

पिप्पल्यादिरजस्तूनीप्रतितून्योः सुखाम्बुना ॥३६॥
पिबेद्वा स्नेहलवणं सघृतं क्षारहिंगु वा ।

आध्माने लंघनं पाणितापश्च फलवर्तयः ॥ ३७ ॥
दीपनं पाचनं चैव बस्तिश्चाप्यत्र शोधनः ।

प्रत्याध्माने तु वमनं लंघनं दीपनं तथा ॥ ३८ ॥
प्रत्यष्ठीलाष्ठीलिकयोरन्तर्विद्रधिगुल्मवत् ।

वच व कालीमिर्चके चूर्णके साथ खट्टा दही भोजनके पहिले पीनेसे अपतन्त्रक नष्ट होता है तथा दूसरा भी वातव्याधिक्रम सेवन करना चाहिये । कुब्ज पुरुषको वातनाशक स्नेह व मांसरस तथा दशमूलका सेवन कराकर अच्छा करना चाहिये । तथा पुराने व बढे हुए कुब्जत्वकी चिकित्सा न करनी चाहिये । तूनी तथा प्रतितूनीमें कुछ गरम जलके साथ पिप्पल्यादिगणका चूर्ण पीना चाहिये । अथवा स्नेहलवण अथवा घीके साथ भुनी हींग व लवण खाना चाहिये । पेटमें अफारा होनेपर लंघन कराना, हाथ गरम कर पेटपर फिराना तथा फलवर्ति (जिससे दस्त साफ हो) धारण कराना चाहिये । दीपन, पाचन औषधियोंका तथा शोधनबस्तिका भी प्रयोग करना चाहिये । प्रत्याध्मानमें वमन, लंघन तथा दीपन औषध सेवन करना चाहिये । प्रत्यष्ठीला तथा अष्ठीलिकामें अन्तर्विद्रधि व गुल्मके समान चिकित्सा करनी चाहिये ॥ ३४-३८ ॥

गृध्रसीचिकित्सा

दशमूलीबलारास्नागुडूचीविश्वभेषजम् ॥ ३९ ॥
पिबेदेरण्डतैलेन गृध्रसीखञ्जपंगुषु ।
शेफालिकादलैः क्वाथो मृद्वग्निपरिसाधितः ॥४०॥
दुर्वारं गृध्रसीरोगं पीतमात्रं समुद्धरेत् ।
पञ्चमूलकषायं तु रुबूतैलं त्रिवृद्घृतम् ।
त्रिवृतैवाथवा युक्तं गृध्रसीगुल्मशूलनुत् ॥ ४१ ॥
तैलं घृतं वार्द्रकमातुलुङ्गयो रसं सचुक्रं सगुडं पिबेद्वा
कट्यूरुपृष्ठत्रिकगुल्मशूलगृध्रस्युदावर्तहरः प्रदिष्टः ४२
तैलमेरण्डजं वापि गोमूत्रेण पिबेन्नरः ।
मासमेकं प्रयोगोऽयं गृध्रस्यूरुग्रहापहः ॥ ४३ ॥
गोमूत्रैरण्डतैलाभ्यां कृष्णा पीता सुचूर्णिता ।
दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम् ॥४४॥
अश्नाति यो नरो नित्यमैरण्डतैलसाधितम् ।
वार्ताकं गृध्रसीखिन्नः पूर्वामाप्नोत्यसौ गतिम् ॥४५
पिष्ट्वैरण्डफलं क्षीरे सविश्वं वा फलं रुबोः ।

पायसो भक्षितः सिद्धो गृध्रसीकटिशूलनुत् ॥ ४६ ॥

दशमूल, खरेटी, रासन, गुर्च, सोंठका चूर्ण एरण्ड़तैलके साथ गृध्रसी, खञ्ज तथा पंगुतामें पीना चाहिये । अथवा सम्भालूकी पत्तीका क्काथ मन्द आंचपर पकाकर पीना चाहिये । इससे शीघ्र ही गृध्रसी रोग नष्ट होता है । अथवा पञ्चमूलका क्काथ, एरण्डतैलके साथ अथवा निसोथ व घीके साथ अथवा केवल निसोथके साथ पीना चाहिये । इससें गृध्रसी, गुल्म, व शूल नष्ट होता है । इसी प्रकार तैल अथवा घी अदरख व बिजौरे नीम्बूके रस तथा चूकाके साथ अथवा गुड़के साथ पीनेसे कमर, ऊरु, पीठ, त्रिक तथा गुल्मका शूल, गृध्रसी व उदावर्त रोग नष्ट होते हैं । अथवा एरण्ड़का तैल गोमूत्रके साथ एक मासतक पीनेसे गृध्रसी तथा उरुस्तम्भ रोग नष्ट होता है । छोटी पीपलका चूर्ण गोमूत्र व एरण्ड़तैलके साथ पीनेसे कफवातज पुरानी गृध्रसी नष्ट होती है । जो मनुष्य एरण्डतैलमें भूने बैंगन प्रतिदिन खाता है । उसका गृध्रसी रोग नष्ट होता तथा पूर्वकेसमान शरीर होता है । एरण्ड़के केवल बीज अथवा सोंठ सहित पीस दूधमें मिलाकर खीर बना खानेसे गृध्रसी तथा कमरका दर्द नष्ट होता है ॥ ३९-४६ ॥

रास्नागुग्गुलुः

रास्नायास्तु पलं चैकं कर्षान्पञ्च च गुग्गुलोः ।
सर्पिषा वटिकां कृत्वा खादेद्वा गृध्रसीहराम् ॥४७॥

रासन ४ तोला, गुग्गुलु २० तोला दोनों एकमें मिला घीके साथ गोली बनाकर खानेसे गृध्रसी रोग नष्ट होता है ॥ ४७ ॥

गृध्रस्या विशेषचिकित्सा

गृध्रस्यार्तं नरं सम्यक्पाचनाद्यैर्विशोधितम् ।
ज्ञात्वा नरं प्रदीप्ताग्निं बस्तिभिः समुपाचरेत् ॥४८॥

नादौ बस्तिविधिं कुर्याद्यावदूर्ध्वं न शुध्यति ।
स्नेहो निरर्थकस्तस्य भस्मन्येवाहुतिर्यथा ॥ ४९ ॥

गृध्रास्यार्तस्य जंगायाः स्नेहस्वेदे कृते भृशम् ।
पद्भ्यां निर्मर्दितायाश्च सूक्ष्ममार्गेण गृध्रसीम् ॥५०

अवतार्यांगुलो सम्यक्कनिष्ठायां शनैः शनैः ।
ज्ञात्वा समुन्नतं ग्रंथिं कण्डरायां व्यवस्थितम् ॥५१

तं शस्त्रेण विदार्याशु प्रवालांकुरसन्निभम् ।
समुद्धृत्याग्निना दग्ध्वा लिम्पेद्यष्ट्याह्वचन्दनैः ५२

विध्येच्छिरां पिद्रबस्तेरधस्ताच्चतुरंगुले ।
यदि नोपशमं गच्छेद्दहेत्पादकनिष्ठिकाम् ॥ ५३ ॥

गृध्रसीसे पीड़ित पुरुषको पहिले पाचनादिसे शुद्ध कर अग्नि दीप्त हो जानेपर बस्ति देना चाहिये जबतक ऊर्ध्वभाग शुद्ध न हो जाय, तबतक बस्ति देना चाहिये ।क्योंकि विना शुद्धि स्नेह भस्ममें आहुतिके समान व्यर्थ होता है । तथा जंघामें स्नेहन व स्वेदन खूब करनेके अनन्तर पैरोंमें दबवाना चाहिये,फिर ऊपरसे दबा दबाकर गृध्रसीकी गांठको धीरे धीरे कनिष्ठिका अंगुलीमें लाकर जब यह विदित हो जाय कि गांठ नसमें आकर ऊंची उठ गयी है, तब उसे शस्त्रसे काटकर निकाल देना चाहिये। वह मूंगेके अंकुरके सदृश निकलेगी,उसे निकालकर उस स्थानको अग्निसे जलाकर मौरेठी व चन्दनका लेप करना चाहिये। अथवा इन्द्रबस्तिके ४ अंगुल नीचे शिराव्यध करना चाहिये । और यदि इससे भी न शान्त हो तो पैरकी कनिष्ठा अंगुलीको जला देना चाहिये ॥ ४८ ५३ ॥

वंक्षणशूलादिनाशकाः योगाः

तगरस्य शिफामार्द्रां पिष्ट्वा तक्रेण यः पिबेत् ।
वंक्षणानिलरोगार्तः स क्षणादेव मुच्यते ॥ ५४ ॥
दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कटिशूलेषु सर्वेषु तैलमेरण्डसम्भवम् ॥ ५५ ॥

वंक्षण सन्धिमें जिसके शूल हो, उसे तगरकी जड़ पीसकर मट्ठेके साथ पीना चाहिये। तथा दशमूलके काढ़ेके साथ अथवा सोंठके काढ़ेके साथ समस्त कटिशूलोंमें एरण्ड तैल पिलाना चाहिये ॥ ५४ ॥ ५५ ॥

शिराव्यधः

विश्वाच्यां खञ्जपंग्वोश्च दाहे हर्षे च पादयोः ।
क्रोष्टुशीर्षविकारे च विकारे वातकण्टके ॥ ५६ ॥
शिरां यथोक्तां निर्विध्य चिकित्सा वातरोगनुत् ।

विश्वाची, खञ्जवात, पंगुता, पादहर्ष तथा पाददाह व क्रोष्टुकशीर्ष व वातकण्टक रोगमें जो शिरा उचित हो, उसका व्यध कर वातरोगनाशक चिकित्सा करनी चाहिये ॥ ५६ ॥

पाददाहचिकित्सा

शिराव्यधः पाददाहे वाते कण्टकवत् क्रिया॥५७॥
क्षतधौतघृतोन्मिश्रैर्नागकेशरकण्टकैः ।
पिष्टैः प्रलेपः सेकश्च दशमूल्यम्बुनेष्यते ॥ ५८ ॥
आलिप्य नवनीतेन स्वेदो हस्तादिदाहहा ।

पाद दाहमें शिराव्यध करना चाहिये तथा वातकण्टक रोगके समान चिकित्सा करनी चाहिये । नागकेशरके काण्टोंको महीन पीस सौ वार धोये हुए घीमें मिलाकर लेप करने तथा दशमूल क्वाथका सिञ्चन करनेसे पाद दाह शान्त होता है। मक्खनसे लेप कर स्वेदन करनेसे हस्तादि दाह नष्ट होता है ॥ ५७-५८ ॥

पादहर्षचिकित्सा

अग्नितप्तेष्टिकाखण्डं काञ्जिकैः परिषिच्य तु ।
तद्बाष्पस्वेदनं कार्यं पादहर्षविनाशनम् ॥ ५९ ॥

अग्निमें तपाये गये ईंटके टुकड़ेको काञ्जीमें बुझाने पर जो बाष्प उठता है, उससे स्वेदन करनेसे पादहर्ष शान्त होता है ॥ ५९ ॥

झिञ्झिनिवातचिकित्सा

दशमूलस्य निर्य्यूहो हिंगुपुष्करसंयुतः ।
शमयेत् परिपीतस्तु वातं झिञ्झिनिसंज्ञितम्॥६०॥

दशमूलका क्वाथ भुनी हींग व पोहकरमूलका चूर्ण मिलाकर पीनेसे झिञ्झिनी वात नष्ट होता है ॥ ६० ॥

क्रोष्टुकशीर्षवातकण्टकखल्लीचिकित्सा

गुग्गुलुं क्रोष्टुशीर्षे तु गुडूचीत्रिफलाम्भसा ।
क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारकम् ॥ ६१ ॥
रक्तावसेचनं कुर्यादभीक्ष्णं वातकण्टके ।
पिबेदेरण्डतैलं वा दहेत्सूचिभिरेव वा ॥ ६२ ॥
खल्ल्यां स्निग्धाम्ललवणैः स्वेदनमर्दोपनाहनम् ।

गुर्च व त्रिफलाके काढ़ेके साथ गुग्गुलु अथवा दूधके साथ एरण्डतैल अथवा विधारेका चूर्ण पीना चाहिये। वातकण्टक रोगमें वार वार रक्तमोक्षण (फस्त खुलाना) कराना चाहिये । अथवा एरण्डतैल पीना चाहिये । अथवा सुईसे जला देना चाहिये। खल्लीरोगमें चिकने खट्टे व नमकीन पदार्थोंसे स्वेदन, मर्दन व उपनाहन करना चाहिये ॥ ६१ ॥ ६२ ॥

आदित्यपाकगुग्गुलुः

पृथक्पलांशा त्रिफला पिप्पली चेति चूर्णितम्॥६३
दशमूलाम्बुना भाव्यं त्वगेलार्धपलान्वितम् ।
दत्त्वा पलानि पञ्चैव गुग्गुलोर्वटकीकृतः ॥ ६४ ॥
एष मांसरसाभ्यासाद्वातरोगान्विशेषतः ।
हन्ति सन्ध्यस्थिमज्जस्थान्वृक्षमिन्द्राशनिर्यथा ॥६५

त्रिफला,छोटी पीपल प्रत्येक ४ तोला,दालचीनी, इलायची प्रत्येक २ तोला मिला चूर्णकर २० तोला गुग्गुल मिलाकर दशमूलके काढ़ेसे सात भावना देनी चाहियें, फिर गोली बना लेनी चाहिये । यह मांसरसके साथ खानेसे सन्धि, अस्थि तथा मज्जागत वातरोगोंको वृक्षको इन्द्रवज्रके समान नष्ट करता है ॥ ६३-६५ ॥

भावनाविधिः

भाव्यद्रव्यसमं क्वाथ्यं क्वाथोऽष्टांशस्तु तेन च ।
आर्द्रं यावद्दिनं भाव्यं सप्ताहं भावनाविधिः॥६६॥

जितने द्रव्यकी भावना देनी हो, उतने ही क्काथ द्रव्य (जिसका काढा बनाया जाय) लेना चाहिये और उसका अष्टमांश क्काथ रखकर उतार छान भिगोना चाहिये, ऐसा कि जिससे दिनभर गीला रहे। सात दिनतक भावना देनी चाहिये ॥ ६६ ॥

आभादिगुग्गुलुः

आहा (भा) श्वगन्धाहपुष-गुडूची-
शतावरीगोक्षुरवृद्धदारकम् ।
रास्नाशनाह्वासशठीयमानी-
सनागरा चेति समैश्च चूर्णम् ॥ ६७ ॥

तुल्यं भवेत्कौशिकमत्र मध्ये
देयं तथा सर्पिरतोऽर्धभागम् ।
अर्धाक्षमात्रं त्वथ तत्प्रयोगात्
कृत्वाऽनुपानं सुरयाथ यूषैः ॥ ६८ ॥

मद्येन वा कोष्णजलेन वाथ
क्षीरेण वा मांसरसेन वापि ।
कटिग्रहे गृध्रसिबाहुपृष्ठे
हनुग्रहे जानुनि पादयुग्मे ॥ ६९ ॥

सन्धिस्थिते चास्थिगते च वाते
मज्जागते स्नायुगते च कोष्ठे ।
रोगाञ्जयेद्वातकफानुविद्धान्
वातेरितान् हृद्ग्रहयोनिदोषान् ॥ ७० ॥

भग्नास्थिविद्धेषु च खञ्जवाते
त्रयोदशाङ्गं प्रवदन्ति तज्ज्ञाः ॥ ७१ ॥

आहा अथवा आभा (बबूलकी छाल अथवा लशुन), असगन्ध, हाऊबेर, गुर्च, शतावरी, गोखुरू, अजवाइन, विधारा, रासन, सौंफ, कचूर, सोंठ सब समान भाग ले कूट, छान चूर्ण कर सबके समान शुद्ध गुग्गुलु तथा गुग्गुलुसे आधा घी मिलाना चाहिये। इसकी ६ माशा मात्रा शराब अथवा यूष अथवा मद्य अथवा कुछ गरम जल अथवा दूध अथवा मांसरसके साथ सेवन करनेसे संधि, अस्थि, मज्जा, स्नायु तथा कोष्ठगत वात, तथा कफवातके अन्यरोग, हृद्रोग, योनिदोष, भग्न, अस्थिविद्ध, खञ्जवात आदि नष्ट होते हैं। इसे "त्रयोदशाङ्ग गुग्गुलु" कहते हैं ॥ ६७–७१ ॥

मिश्रितवातचिकित्सा:

जित्वा वरकमग्रे तु वाते वातहरं हितम् ।
अन्नावृते वद्गुल्लेखो दीपनं पाचनं लघु ॥ ७२ ॥
सुप्तिवाते त्वसृङ्मोक्षं कारयेद्बहुशो भिषक् ।
दिह्याच्च लवणागारधूमैमस्तैलविमर्दितैः ॥ ७३ ॥

मिश्रित वायुमें प्रथम बढे हुए दोषको जीतकर वातहर—चिकित्सा करनी चाहिये। अन्नसे आवृत वायुमें अर्थात् आमाशयमें बढ़े वायुमें पहिले वमनद्वारा शुद्ध कर दीपन, पाचन तथा लघु (हलके) औषधका सेवन करना चाहिये। स्पर्शज्ञान न होनेपर बार बार फस्त खुलाना तथा तैलमें मिलाये हुए नमक तथा गृह धूमका लेप करना चाहिये ॥ ७२ ॥ ७३ ॥

आहारविहाराः

सर्पिस्तैलवसामज्जापानाभ्यञ्जनबस्तयः ॥
स्वेदाः स्निग्धा निवातं च स्थानं प्रावरणानि च ॥

रसाः पयांसि भोज्यानि स्वाद्वम्ललवणानि च ।
बृंहणं यत्तु तत्सर्वं प्रशस्तं वातरोगिणाम् ॥ ७५ ॥

पटोलपालकर्यूषो वृष्यो वातहरो लघुः ।
वाटयालककृतो यूषः परं वातविनाशनः ॥ ७६ ॥

बलायाः पञ्चमूलस्य दशमूलस्य वा रसे ।
अजाशीर्षाम्बुजानूपक्रव्यादपिशितैः पृथक् ॥ ७७ ॥

साधयित्वा रसान्स्निग्धान्दध्यम्लव्योषसंस्कृतान् ।
भोजयेद्वातरोगार्तं तैर्व्यक्तलवणैर्नरम् ॥ ७८ ॥

पञ्चमूलीबलासिद्धं क्षीरं वातामये हितम् ।

घी, तैल, वसा, मज्जाका पीना तथा मालिश करना व वस्ति देना, स्निग्ध स्वेदन, वातरहित स्थान, गरम ओढ़ना, मांसरस, दूध तथा उससे बनाये पदार्थ, मीठे, खट्टे, नमकीन पदार्थ तथा जो शरीरको बढ़ाते हैं वे सब वातरोगको नष्ट करते हैं। तथा परवल व पालकका यूष वाजीकर, लघु तथा वातनाशक होता है। खरेंटीका यूष वातनाशक द्रव्योंमें श्रेष्ठ है। (यहांपर कुछ आचार्योंका मत है कि यूष होनेसे यूषप्रधान मुद्गादि भी छोड़ना चाहिये, कुछका मत है कि नहीं। पर यदि छोड़ी ही जाय तो उड़द छोड़ना चाहिये) तथा खरेंटी, पञ्चमूल तथा दशमूलके क्काथमें बकरेकी मूंडी अथवा जलीय प्राणी अथवा आनूपदेशके प्राणी तथा मांसभक्षक प्राणियोंका मांस पकाकर रस छान स्नेह, तथा दही व त्रिकटु मिलाना चाहिये तथा इन्हींमें नमक मिलाकर भोजनके साथ खाना चाहिये इससे वातरोग नष्ट होते हैं। तथा पञ्चमूल व खरेंटीसे सिद्ध दूध वातरोगको नष्ट करता है ॥ ७४–७८ ॥

वातनाशकगणः

वाजिगन्धा बलास्तिस्रो दशमूली महौषधम् ।
द्वे गृध्रनख्यौ रास्ना च गणो मारुतनाशनः ॥७९॥

असगंध, तीनों बला (खरेंटी, कंघी, गंगेरन) दशमूल, सोंठ, नखनखी, रासन यह गण वायुको नष्ट करता है ॥ ७९ ॥

कोलादिप्रदेहः

कोलं कुलत्थं सुरदारुरास्ना-
माषा उमातैलफलानि कुष्ठम् ।
वचाशताह्वे यवचूर्णमम्ल-
मुष्णानि वातामयिनां प्रदेहः ॥ ८० ॥
आनूपवेशवारोष्णप्रदेहो वातनाशनः ।

बेर, कुलथी, देवदारु, रासन, उड़द, अलसी तथा तिल आदि तैलद्रव्य, कूठ, वच सौंफ,सोवा, यवचूर्ण, कांजी सबको गरम कर वातरोगवालोंके लेप करना चाहिये । अथवा आनूप-मांसके वेशवारका गरम गरम लेप करना चाहिये ॥ ८० ॥

वेशवारः

निरस्थि पिशितं पिष्टं स्विन्नं गुडघृतान्वितम् ॥८१॥
कृष्णामरिचसंयुक्तं वेशवार इति स्मृतम् ।

हड्डी रहित मांसको पीस पकाकर गुड़, घी, मिर्च, व पीपल मिलानेसे "वेशवार" बनता है ॥ ८१ ॥–

शाल्वणभेदः

काकोल्यादिः स वातघ्नः सर्वाम्लद्रव्यसंयुतः ॥८२॥
सानूपमांसः सुस्विन्नः सर्वस्नेहसमन्वितः ।
सुखोष्णः स्पष्टलवणः शाल्वणः परिकीर्तितः ॥८३॥
तेनोपनाहं कुर्वीत सर्वदा वातरोगिणाम् ।
वातघ्नो भद्रदार्वादिः काकोल्यादिस्तु सौश्रुतः ८४॥
मांसेनात्रौषधं तुल्यं यावताम्लेन चाम्लता ।
पट्वी स्यात्स्वेनार्थं च काञ्जिकाद्यम्लमिष्यते ॥८५॥
चतुःस्नेहोऽत्र तावान्स्यात्सुस्विन्नत्वं यतो भवेत् ।
समस्तं वर्गमर्धं वा यथालाभमथापि वा ॥ ८६ ॥
प्रयुञ्जीतेति वचनं सर्वत्र गणकर्मणि ।

काकोल्यादिगण, वातघ्न भद्रदार्वादिगण तथा अम्लद्रव्य, काञ्जी,आनूपमांस चारों स्नेहोंमें सेंक कुछ नमक मिलाकर गरम गरम उपनाहन (पुल्टिस) करना चाहिये । इसमें वातघ्न गत देवदार्वादिगण, काकोल्यादिगण, सुश्रुतोक्त इनके चूर्णके समान मांस तथा जितनेसे खट्टा हो जावे, उतना काञ्जी आदि खट्टा द्रव्य छोड़ना चाहिये । तथा इसको बांधकर ऊपरसे पट्टी बांधनी चाहिये । स्नेह चारों मिलाकर इतने ही छोड़ने चाहियें जिससे अच्छी तरह पक जावे । इसमें समस्त अथवा आधे अथवा यथालाभ द्रव्य मिलाने चाहियें । यही नियम सब गणोंमें समझना चाहिये ॥ ८२-८६ ॥

अश्वगन्धाघृतम्

अश्वगन्धाकषाये च कल्के क्षीरचतुर्गुणम् ॥ ८७ ॥
घृतं पक्वं तु वातघ्नं वृष्यं मांसविवर्धनम् ।

असगन्धके काढ़े तथा कल्कमें चतुर्गुण दूधके साथ सिद्ध हुआ घृत वातनाशक,वाजीकर तथा मांसवर्द्धक होता है॥८७॥–

दशमूलघृतम्

दशमूलस्य निर्यूहे जीवनीयैः पलोन्मितैः ॥ ८८ ॥
क्षीरेण च घृतं पक्वं तर्पणं पवनार्तिनुत् ।

२ प्रस्थ घी, २ प्रस्थ दूध, ६ प्रस्थ दशमूलका क्वाथ तथा जीवनीय गणकी औषधियां प्रत्येक ४ तोला छोड़कर सिद्ध किया घृत तृप्तिकारक तथा वातनाशक होता है ॥ ८८ ॥ ८९ ॥

आजघृतम्

आजं चर्मविनिर्मुक्तं त्यक्तशृङ्गखुरादिकम् ।
पञ्चमूलीद्वयं चैव जलद्रोणे विपाचयेत् ॥ ९० ॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ।
जीवनीयैः सयष्ट्याह्वैः क्षीरं चैव शतावरीम् ९१॥
छागलाद्यमिदं नाम्ना सर्ववातविकारनुत् ।
अर्दिते कर्णशूले च बाधिर्ये मूकमिन्मिने ॥ ९२ ॥
जडगद्गदपंगूनां खञ्जे गृध्रसिकुब्जयोः ।
अपतानेऽपतन्त्रे च सर्पिरेतत्प्रशस्यते ॥ ९३ ॥
द्रोणे द्रव्यतुलाश्रुतया स्याच्छागदशमूलयोः ।
पृथक् तुलार्धं यष्ट्याह्वद्वयं देयं द्विधोक्तितः ॥ ९४ ॥

चर्म, सींग, तथा खुर आदिसे रहित बकरेका मांस २॥सेर तथा दशमूल मिलित २॥ सेर २५ सेर ४८तो० जलमें पकाना चाहिये, चतुर्थांश रहनेपर उतार छानकर १ प्रस्थ घी तथा जीवणीय गणकी औषधियां व मौरेठी व शतावरका कल्क तथा घीके बराबर दूध मिलाकर पकाना चाहिये । यह "छागलादि घृत" समस्त वातरोग यथा–अर्दित, कर्णशूल, बाधिर्य, मूकता, मिन्मिनापन, जड़ता, गद्गदवाणी तथा पंगुता, खञ्ज, गृध्रसी, कुब्जता, अपतानक व अपतन्त्रकको नष्ट करता है । १ द्रोण जलमें १ तुला क्वाथ छोड़ना चाहिये, अतएव मांस व दशमूल दोनों आधा तुला पृथक् पृथक् मिलनेसे १ तुला

---

१ काकोल्यागण, तथा वातघ्न भद्रदार्वादिगण यहां सुश्रुतोक्त लेना चाहिये । उनके पाठ इस प्रकार हैं । " काकोल्यौ मधुकामेदे जीवकर्षभकौ सहे । ऋषिर्वृद्धिस्तुगाक्षीरी पुण्डरीकं सपद्मकम् ॥ जीवन्ती सामृता शृङ्गी मृद्वीका चेति कुत्रचित् । काकोल्यादिरयं पित्तशोणितानिलनाशनः ॥"इति काकोल्यादिः। "भद्रदारु निशे भार्ङ्गी वरुणो मेषशृङ्गिका । जटाझिण्टी चार्तगलो वरा गोक्षुरतण्डुलाः ॥ अर्कौ श्वदंष्ट्रा गणिका धत्तूरश्वाश्मभेदकः । वरी स्थिरा पाटला दृग्वर्षाभूर्वंशुको यवः ॥ भद्रदार्वादिरित्येष गणो वातविकारनुत् ॥ "

हुआ। मौरेठी दोनों छोड़ना चाहिये। क्योंकि दो मौरेठीकी, जातियां हैं ॥ ९०-९४ ॥

एलादितैलम्

एलामुरासरलशैलजदारुकौन्ती-
चण्डाशटीनलदचम्पकहेमपुष्पम्।
स्थौणेयगन्धरसपूतिदलामृणाल-
श्रीवासकुन्दुरुनखाम्बुवराङ्गकुष्ठम् ॥ ९५ ॥

कालीयकं जलदकर्कटचन्दनश्री-
जात्याः फलं सविकसं सहकुंकुमं च।
स्पृक्कातुरुष्कलघु लाभतया विनीय
तैलं बलाक्वथनदुग्धयुतं च दध्ना ॥ ९६ ॥
साधं पचेत्तु हितमेतदुदाहरन्ति
वातामयेषु बलवर्णवपुःप्रकारि ॥

छोटी इलायची, मुरामांसी, सरल (देवदारुविशेष) भूरिछरीला, देवदारु, सम्भालूके बीज, चोरक, कचूर, जटामांसी, चम्पा, नागकेशर, थुनेर बोल, खट्टाशी, तेजपात, कमलकी डण्डी, गन्धाविरेजा, तार्पीन, नख, सुगन्धवाला, दालचीनी, कूठ, तगर, नागरमोथा, काकड़ाशिंगी, सफेद चन्दन, जायफल, मञ्जीठ, केशर, चतुर्गुण खरेटीका क्वाथ तथा उतना दूध व उतना ही दही मिलाकर पकाना चाहिये। यह तैल वातरोगोंको नष्ट करता तथा बल, वर्ण व शरीरको उत्तम बनाता है ॥ ९५ ॥ ९६ ॥

बलाशैरीयकतैले

बलानिष्क्वाथकल्काभ्यां तैलं पक्वं पयोऽन्वितम्।
सर्ववातविकारघ्नमेवं शैरीयपाचितम् ॥ ९७ ॥

बलाके क्वाथ व कल्क अथवा कटसैलाके क्वाथ व कल्कसे सिद्ध तैल समस्त वातरोगोंको नष्ट करता है। इसमें तैलके समान दूध भी छोड़ना चाहिये ॥ ९७ ॥

महाबलातैलम्

बलामूलकषायस्य दशमूलीकृतस्य च।
यवकोलकुलत्थानां क्वाथस्य पयसस्तथा ॥ ९८ ॥
अष्टावष्टौ शुभा भागास्तैलादेकस्तदेकतः।
पचेदावाप्य मधुरं गणं सैन्धवसंयुतम् ॥ ९९ ॥
तथागुरुं सर्जरसं सरलं देवदारु च।
मञ्जिष्ठां चन्दनं कुष्ठमेलां कालानुशारिवाम्॥१००
मांसीं शैलेयकं पत्रं तगरं शारिवां वचाम्।
शतावरीमश्वगन्धां शतपुष्पां पुनर्नवाम् ॥ १०१ ॥
तत्साधु सिद्धं सौवर्णे राजते मृण्मयेऽपि वा।
प्रक्षिप्य कलशे सम्यक्सुनिगुप्तं निधापयेत्॥१०२॥
बलातैलमिदं नाम्ना सर्ववातविकारनुत्।
यथाबलमितो मात्रां सूतिकायै प्रदापयेत् ॥ १०३ ॥
या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान्।
क्षीणवाते मर्महते ऽभिहते मथितेऽथवा ॥ १०४ ॥
भग्ने श्रमाभिपन्ने च सर्वथैवोपयोजयेत्।
सर्वानाक्षेपकादींश्च वातव्याधीन्व्यपोहति॥१०५॥
हिक्काकासमधीमन्थं गुल्मश्वासं सुदुस्तरम्।
षण्मासानुपयुज्यैतदन्त्रवृद्धिमपोहति ॥ १०६ ॥
प्रत्यग्रधातुः पुरुषो भवेच्च स्थिरयौवनः।
एतद्धि राज्ञा कर्तव्यं राजमात्राश्च ये नराः ॥१०७॥
सुखिनः सुकुमाराश्च बलिनश्चापि ये नराः।

खरेटीकी जड़का क्वाथ, दशमूलका क्वाथ, यव, बेर, कुलथीका क्वाथ तथा दूध प्रत्येक ८ भाग, तिलतैल १ भाग तथा जीवकादि मधुर गणकी औषधियाँ व सेंधानमक, अगर, राल, सरल, देवदारु, मञ्जीठ, चन्दन, कूठ, इलायची, काली शारिवा, जटामांसी, छरीला, तेजपात, तगर, शारिवा, वच, शतावरी, असगन्ध, सौंफ, पुनर्नवाकी जड़ सबका कल्क, तैलसे चतुर्थांश मिलाकर सिद्ध किया तैल सोने, चांदी अथवा मिट्टीके बर्तनमें रखकर समयपर प्रयोग करना चाहिये। यह वातरोगोंको नष्ट करनेवाला "बलातैल" है। इसकी मात्रा बलके अनुसार सूतिका स्त्रीको देना चाहिये। जो स्त्री गर्भकी इच्छा करती है अथवा जो पुरुष क्षीण हो गया है तथा क्षीणतासे बढ़े हुए वायु तथा मर्माभिघात अथवा कहीं अभिघात या मथित हो, टूट गया हो अथवा थकावट हो इनमें इसका प्रयोग करना चाहिये। आक्षेपकादि समस्त वातरोगोंको नष्ट करता तथा हिक्का, कास, अधिमन्थ, गुल्म, श्वासको नष्ट करता है। इसके ६ मासतक प्रयोग करनेसे अन्त्रवृद्धि नष्ट होती है, नवीन धातु बनते हैं, यौवन स्थिर होता है। यह राजाओं, धनिकों, सुखी पुरुषों, सुकुमार तथा बलवानोंके लिये बनाना चाहिये ॥ ९८–१०७ ॥

नारायणतैलम्

बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ॥१०८॥
बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान्भागांश्चतुर्द्रोणेऽम्भसः पचेत् ॥१०९॥

१-इसके आगे नवीन पुस्तकोंमें विष्णुतैल नामक एक तैल लिखा है। पर प्राचीन प्रतियोंमें न होनेके कारण उसे यहां न लिखकर प्रकरणके अन्तमें लिखा है ॥

पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत् ।
शतपुष्पा देवदारु मांसी शैलेयकं वचा ॥ ११० ॥

चन्दनं तगरं कुष्ठमेला पर्णीचतुष्टयम् ।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम् ॥१११॥

एषां द्विपलिकान्भागान्पेषयित्वा विनिक्षिपेत् ।
शतावरीरसं चैव तैलतुल्यं प्रदापयेत् ॥ ११२ ॥

आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
पाने बस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते॥११३॥

अश्वो वा वातसम्भग्नो गजो वा यदि वा नरः ।
पंगुलः पीठसर्पी च तैलेनानेन सिध्यति ॥ ११४ ॥

अधोभागे च ये वाताः शिरोमध्यगताश्च ये ।
दन्तशूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे ॥११५॥

यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला ।
क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः ११६

बधिरा ल्लजिह्वाश्च मन्दमेधस एव च ।
अल्पप्रजा च या नारी या च गर्भं न विन्दति ११७

वाताती वृषणौ येषामन्त्रवृद्धिश्च दारुणा ।
एतत्तैलवरं तेषां नाम्ना नारायणं स्मृतम् ॥ ११८ ॥

तगरं नतमत्र स्यादभावे शीतली जटा ।

बेलकी छाल या गूदा, अरणी, सोनापाठा, पाढ़ल, नीम या फरहद, गन्धप्रसारणी, असगन्ध, बड़ी कटेरी, छोटी कटेरी, खरेटी, कंघी, गोखुरू, पुनर्नवा प्रत्येक आधा सेर १०२ सेर ३२ तोला जलमें पकाना चाहिये । चतुर्थांश रहनेपर उतार छानकर ६ सेर ३२ तो० तिलतैल तथा सौंफ, देवदारु, जटामांसी, छरीला, वच, चन्दन, तगर, कूठ, इलायची, मुद्गपर्णी, माषपर्णी, शालपर्णी, पृष्ठिपर्णी, रासन, असगन्ध, सेंधानमक, पुनर्नवा प्रत्येक ८ तोलाका कल्क तथा शतावरीका रस ६ सेर ३२ तोला और गाय अथवा बकरीका दूध २५ सेर ४८ तोला मिलाकर पकाना चाहिये । यह तेल पीने बस्ति देने तथा मालिश व भोजनके साथ देनेके लिये हितकर है । वातसे पीड़ित घोड़ा, हाथी अथवा मनुष्य इससे सभी सुखी होते हैं । इससे पंगु तथा लकड़ियों पैरोंके सहारे घसीटकर चलनेवाला भी अच्छा होता है । जो वातरोग अधोभागमें तथा जो शिरमें होते हैं, वे नष्ट होते हैं । दन्तशूल, हनुस्तम्भ, मन्यास्तम्भ, गलग्रह इससे अच्छे होते हैं । जिसका एक अंग सूख रहा है अथवा जिसकी गति ठीक नहीं है जिसकी इन्द्रियां शिथिल, वीर्य नष्ट तथा जो ज्वरसे क्षीण हैं, जो बहिरे, जिह्वाशक्ति रहित, तथा मन्द बुद्धिवाले हैं, जिनके संतान कम होती अथवा होती ही नहीं, जिनके अण्डकोष वायुसे पीड़ित कठिन अन्त्रवृद्धि है, उनके लिये यह उत्तम "नारायण" तैल लिखा है। तगर न मिलनेपर शीतली जटा (शीतकुंभी नामक जलजवृक्ष) छोड़नी चाहिये ॥ १०८-११८ ॥

महानारायणतैलम्

शतावरी चांशुमति पृश्निपर्णी शटी वरा ।
एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च ११९॥
गवेधुकस्य मूलानि तथा सहचरस्य च ।
एषां दशपलान्भागाञ्जलद्रोणे विपाचयेत् ॥१२०॥
पादावशेषे पूते च गर्भं चैनं समापयेत् ।
पुनर्नवा वचा दारु शताह्वा चन्दनागरु ॥ १२१॥
शैलेयं तगरं कुष्ठमेला मांसी स्थिरा बला ।
अश्वाह्वा सैन्धवं रास्ना पलार्धानि च पेषयेत् १२२
गव्याजपयसोः प्रस्थौ द्वौ द्वावत्र प्रदापयेत् ।
शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत् ॥ १२३ ॥
अस्य तैलस्य सिद्धस्य शृणु वीर्यमतः परम् ।
अश्वानां वातभग्नानां कुञ्जराणां नृणां तथा ॥१२४॥
तैलमेतत्प्रयोक्तव्यं सर्ववातनिवारणम् ।
आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत् १२५
गर्भमश्वतरी विन्देत्किं पुनर्मानुषी तथा ।
हृच्छूलं पार्श्वशूलं च तथैवार्धावभेदकम् ॥ १२६ ॥
अपचीं गण्डमालां च वातरक्तं हनुग्रहम् ।
कामलां पाण्डुरोगं च ह्यश्मरीं चापि नाशयेत्१२७
तैलमेतद्भगवता विष्णुना परिकीर्तितम् ।
नारायणमिति ख्यातं वातान्तकरणं परम् ॥१२८॥

शतावर, शालपर्णी, पिठिवन, कचूर, त्रिफला, एरण्डकी जड़की छाल, छोटी बड़ी कटेरीकी जड़, पूतिकरञ्जकी जड़, नागबलाकी जड़, पियवासाकी जड़ प्रत्येक ४० तोला जल २५ सेर ४८ तोला छोड़कर पकाना चाहिये । चतुर्थांश शेष रहनेपर उतार छानकर क्वाथमें पुनर्नवा, वच, देवदारु, सौंफ, चन्दन, अगर, छरीला, तगर, कूट, इलायची, जटामांसी, शालपर्णी, खरेटी, असगन्ध, सेंधानमक, रासन प्रत्येक २ तोलाका कल्क तथा गायका दूध २ प्रस्थ तथा बकरीका दूध २ प्रस्थ तथा बकरीका दूध २ प्रस्थ, शतावरका रस१ प्रस्थ तथा तिलतैल १ प्रस्थ छोड़कर पकाना चाहिये ।यह तैल वातपीड़ित घोड़ों, हाथियों तथा मनुष्योंको लाभ पहुंचता है । इसके पीनेसे आयु बढ़ती तथा शरीर दृढ़ होता है । खच्चरी भी गर्भ धारण करती है फिर स्त्रीके लिये तो क्या कहना।हृदयका दर्द,पार्श्वशूल, अर्धावभेद, अपची, गण्डमाला, वातरक्त, हनुग्रह, कामला,

१ "शीतली, शीतकुम्भी च शुक्रपुष्पा जलोद्भवा।" इति रत्नमालायाम्।

पाण्डुरोग तथा अश्मरीको नष्ट करता है। यह तैल साक्षात् भगवान् विष्णुका बनाया हुआ समस्त वातरोगोंको नष्ट करनेवाला है ॥ ११९-१२८ ॥

अश्वगन्धातैलम्

शतं पक्त्वाश्वगन्धाया जलद्रोणेऽवशेषितम् ।
विस्राव्य विपचेत्तैलं क्षीरं दत्त्वा चतुर्गुणम् ॥१२९॥
कल्कैर्मृणालशालूकबिसकिञ्जल्कमालती ।--
पुष्पैर्ह्रीबेरमधुकशारिवापद्मकेशरैः ॥ १३० ॥
मेदापुनर्नवाद्राक्षामञ्जिष्ठाबृहतीद्वयैः ।
एलैलवालुत्रिफलामुस्तचन्दनपद्मकैः ॥ १३१ ॥
पक्वं रक्ताश्रयं वातं रक्तपित्तमसृग्दरम् ।
हन्यात्पुष्टिबलं कुर्यात्कृशानां मांसवर्धनम् ॥१३२॥
रेतोयोनिविकारघ्नं घ्राणशोषापकर्षणम् ।
षण्ढानपि वृषान्कुर्यात्पानाभ्यङ्गानुवासनैः ॥१३३॥

असगन्ध ५ सेर जल १ द्रोणमें पकाना तथा चतुर्थांश रहनेपर उतार छान १ प्रस्थ तिलतैल ४ प्रस्थ दूध तथा कमलकी डण्डी, कमलकी जड़, कमलके तन्तु तथा कमलका केशर, मालतीके फूल, सुगन्धवाला, मौरेठी, शारिवा, कमलके फूल, नागकेशर, मेदा, पुनर्नवा, मुनक्का, मजीठ, छोटी, कटेरी, बड़ी कटेरी, छोटी बड़ी इलायची, एलवालुक, त्रिफला, नागरमोथा, चन्दन, पद्माख, प्रत्येकका मिला हुआ कल्क तैलसे चतुर्थांश छोड़कर पकाना चाहिये। यह तैल रक्ताश्रित वात, रक्तपित्त, रक्तप्रदरको नष्ट करता, पुष्टि तथा बल बढ़ाता और कृश पुरुषोंके मांसको बढ़ाता, रज व वीर्यके दोषोंको नष्ट करता, नाकका सूखना नष्ट करता तथा नपुंसकोंको भी पीने, मालिश तथा अनुवासन वस्तिसे पुरुषत्व प्रदान करता है ॥ १२९-१३३ ॥

मूलकाद्यं तैलम्

मूलकस्वरसं तैलं क्षीरदध्यम्लकाञ्जिकम् ।
तुल्यं विपाचयेत्कल्कैर्बलाचित्रकसैन्धवैः ॥ १३४॥
पिप्पल्यतिविषारास्नाचविकागुरुचित्रकैः ।
भल्लातकवचाकुष्ठश्वदंष्ट्राविश्वभेषजैः ॥ १३५ ॥
पुष्कराह्वशटीबिल्वशताह्वनतदारुभिः ।
तत्सिद्धं पीतमत्युग्रान्हन्ति वातात्मकान्गदान् १३६

मूलीका स्वरस, तिलतैल, खट्टा दही, काञ्जी प्रत्येक समान भाग तथा खरेटी, चीतकी जड़, सेंधानमक, छोटी पीपल, अतीस, रासन, चव्य, अगर, चीतकी जड़, भिलावां बच, कूठ, गोखुरू, सोंठ, पोहकरमूल, कचूर, बेलका गूदा, सौंफ, तगर, देवदारुका मिलित कल्क तैलसे चतुर्थांश छोड़कर पकाना चाहिये। यह तैल पीनेसे उग्रवातात्मक रोगोंको नष्ट करता है ॥ १३४-१३६ ॥

रसोनतैलम्

रसोनकल्कस्वरसेन पक्वं
तैलं पिबेद्यस्त्वनिलामयार्तः ।
तस्याशु नश्यन्ति हि वातरोगा
ग्रन्था विशाला इव दुर्गृहीताः ॥ १३७ ॥

जो वातव्याधिसे पीड़ित पुरुष लहसनके कल्क व स्वरससे पकाया हुआ तैल पीता है, उसके वातरोग इस प्रकार शीघ्र ही नष्ट हो जाते हैं जैसे दुष्टके हाथमें पड़े हुए अथवा ज्ञानपूर्वक न पढ़े गये विशाल ग्रन्थ ॥ १३७ ॥

केतक्याद्यं तैलम्

केतकिनागबलातिबलानां
यद्बहुलेन रसेन विपक्वम् ।
तैलमनल्पतुषोदकसिद्धं
मारुतमस्थिगतं विनिहन्ति ॥ १३८ ॥

अनल्पवचनात्तत्र तुल्ये क्वाथतुषोदके ।
अकल्कोऽपि भवेत्स्नेहो यः साध्यः केवले द्रवे १३९

केवड़ा, गङ्गेरन व कंघीके क्वाथ तथा काञ्जीमें सिद्ध किया गया तैल अस्थिगत वायुको शान्त करता है। इसमें प्रत्येक द्रव्यका क्वाथ तथा तुषोदक (काञ्जी) तैलके बराबर छोड़ना चाहिये। कल्कके बिना भी स्नेह सिद्ध होता है, जो केवल द्रवमें सिद्ध किया जाता है ॥ १३८ ॥ १३९ ॥

सैन्धवाद्यं तैलम्

द्वे पले सैन्धवात्पञ्च शुण्ठ्या ग्रन्थिकचित्रकात् ।
द्वे द्वे भल्लातकास्थिनी विंशतिर्द्वे तथाढके ॥ १४०॥
आरनालात्पचेत्प्रस्थ तैलमेतैरपत्यदम् ।
गृध्रस्यूरुग्रहार्शोऽर्तिसर्ववातविकारनुत् ॥ १४१ ॥

सेंधानमक २ पल, सोंठ ५ पल, पिपरामूल २ पल, चीतकी जड़ २ पल, भिलावांकी गुठली २० गिनी हुई, काञ्जी २ आढ़क तथा तैल १ प्रस्थ मिलाकर पकाना चाहिये। यह तैल सन्तानदायक तथा गृध्रसी, ऊरुग्रह, अर्श और वातरोगोंको नष्ट करता है ॥ १४० ॥ १४१ ॥

---

१ इसमें कल्क अधिक है, अतः "द्विगुणं तद् द्रवार्द्रयोः" इस परिभाषाको लगाकर द्विगुण अर्थात् ११८ तोला और द्विगुण काञ्जी अर्थात् १२ सेर ६४ तोला छोड़ना चाहिये।

माससैन्धवतैलम्

तैलं सङ्कुचितेऽभ्यंगो माषसैन्धवसाधितम् ।
बाहौ शीर्षगते नस्यं पानं चौत्तरभक्तिकम् ॥
क्वाथोऽत्र माषनिष्पाद्यः सैन्धवं कल्कमेव च१४२

उड़दका क्वाथ तथा सेंधानमकका कल्क छोड़कर सिद्ध किया तैल संकुचित अंगोंमें मालिश करनेके लिये तथा बाहु वा शिरोगत वायुमें नस्य तथा भोजनके साथ पिलाना हितकर होता है १४२ ॥

माषादितैलम्

माषात्मगुप्तातिविषोरुबूक-
रास्नाशताह्वालवणैः सुपिष्टैः ।
चतुर्गुणे माषबलाकषाये
तैलं कृतं हन्ति च पक्षवातम् ॥ १४३ ॥

उड़द तथा खरेटीका क्वाथ तथा उड़द, कौंच, अतीस. एरण्ड, रासन, सौंफ सेंधानमकका कल्क छोड़कर सिद्ध किया गया तैल पक्षाघातको नष्ट करता है ॥ १४३ ॥

द्वितीयं माषतैलम्

माषप्रस्थं समावाप्य पचेत्सम्यग्जलाढके ।
पादशेषे रसे तस्मिन्क्षीरं दद्याच्चतुर्गुणम् ॥१४४॥
प्रस्थं च तिलतैलस्य कल्कं दत्त्वाक्षसम्मितम् ।
जीवनीयानि यान्यष्टौ शतपुष्पां ससैन्धवाम् १४५
रास्नात्मगुप्तामधुकं बलाव्योषं त्रिकण्टकम् ।
पक्षघातेऽर्दिते वाते कर्णशूले सुदारुणे ॥ १४६ ॥
मन्दश्रुतौ चाश्रवणे तिमिरे च त्रिदोषजे ।
हस्तकम्पे शिरःकम्पे विश्वाच्यामवबाहुके ॥१४७॥
शस्तं कलायखञ्जे च पानाभ्यञ्जनबस्तिभिः ।
माषतैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहम् ॥ १४८ ॥

१ प्रस्थ उड़द १ आढ़क जलमें पकाना, चतुर्थांश शेष रहनेपर उतार छान लेना चाहिये, फिर इसमें ४ प्रस्थ दूध, तैल १ प्रस्थ तथा जीवनीय गणकी औषधियां तथा सौंफ, सेंधानमकक रासन, कौंचके बीज, मौरेठी, खरेटी, त्रिकटु, गोखरू प्रत्येक १ तोलाका कल्क छोड़कर पकाना चाहिये । यह तैल पक्षाघात, अर्दित, कर्णशूल, कम सुनाई पड़ना या न सुनाई पड़ना, त्रिदोषज तिमिररोग, हस्त तथा शिरके कम्प, विश्वाची, अवबाहुक तथा कलायखञ्जको पीने, मालिश तथा पिचकारी लगानेसे नष्ट करता है ॥ १४४–१४८ ॥

तृतीयं माषतैलम्

माषातसीयवकुरण्टककण्टकारी-
गोकण्टटुण्टुकजटाकपिकच्छुतोयैः ।
कार्पासकास्थिशणबीजकुलत्थकोल-
क्वाथेन बस्तपिशितस्य रसेन चापि ॥१४९
शुण्ठ्या समागधिकया शतपुष्पया च
सैरण्डमूलसपुनर्नवया सरण्या
रास्नाबलामृतलताकटुकैर्विपक्वं
माषाख्यमेतदवबाहुहरं च तैलम् ॥ १५० ॥
अर्धाङ्गशोषमपतानकमाढ्यवात-
माक्षेपकं सभुजकम्पशिरःप्रकम्पम् ।
नस्येन बस्तिविधिना परिषेचनेन
हन्यात्कटीजघनजानुरुजश्च सर्वाः ॥१५१॥

उड़द, अलसी, यव, पियावांसा, भटकटैया, गोखरू, सोनापाठेकी जड़की छाल तथा कौंचके बीज व विनौले, सनके बीज, कुलथी व बेरका क्वाथ तथा बकरेके मांस रस तथा सोंठ, छोटी पीपल, सौंफ, एरण्डकी जड़, पुनर्नवा, गन्धप्रसारणी, रासन, खरेटी, गुर्च, कुटकीका कल्क छोड़कर पकाये गये तैलको अभ्यङ्ग, नस्य, बस्तिकर्म तथा परिषेचनके द्वारा प्रयोग करनेसे अवबाहुक, अर्धाङ्गशोष, अपतानक, ऊरुस्तम्भ, आक्षेपक, भुजा, तथा शिरके कम्पनको दूर करता है । तथा कमर, जंघा व घुटनोंकी पीड़ाको नष्ट करता है ॥ १४९–१५१ ॥

चतुर्थं माषतैलम्

माषक्वाथे बलाक्वाथे रास्नाया दशमूलजे ।
यवकोलकुलत्थानां छागमांसभवे पृथक् ॥ १५२ ॥
प्रस्थे तैलस्य च प्रस्थं क्षीरं दत्त्वा चतुर्गुणम् ।
रास्नात्मगुप्तासिन्धूत्थशताह्वैरण्डमुस्तकैः ॥१५३॥
जीवनीयैर्बलाव्योषैः पचेदक्षसमैर्भिषक् ।
हस्तकम्पे शिरःकम्पे बाहुशोषेऽवबाहुके ॥ १५४ ॥
बाधिर्ये कर्णशूले च कर्णनादे च दारुणे ।
विश्वाच्यामर्दिते कुब्जे गृध्रस्यामपतानके ॥१५५॥
बस्त्यभ्यञ्जनपानेषु नावने च प्रयोजयेत् ।
माषतैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहम् ॥ १५६ ॥
क्वाथप्रस्थाः षडेवात्र विभक्त्यन्तेन कीर्तिताः ।

उड़दका क्वाथ ६४ तोला, खरेटीका क्वाथ ६४ तोला, रासनका क्वाथ ६४ तोला, दशमूलका क्वाथ ६४ तो०, यव, बेर व कुलथीका क्वाथ ६४ तोला तथा बकरेके मांसका क्वाथ

६४ तोला, तैल, ६४ तोला, दूध ३ सेर १६ तोला तथा रासन, कौंचके बीज, सेंधानमक सौंफ, एरण्डकी छाला नागरमोथा, जीवनीयगणकी औषधियां खरेटी, तथा त्रिकटु प्रत्येक १ तोलाका कल्क छोड़कर पकाना चाहिये। यह तैल बस्ति, अभ्यङ्ग, नस्य तथा पानसे हस्त व शिरके कम्प, बाहुशोष, अवबाहुक, बाधिर्य कर्णशूल, कर्णनाद, विश्वाची, अर्दित, कुब्ज, गृध्रसी, अपतानक तथा शिरके रोगोंको नष्ट करता है। द्रव द्रव्य अर्थात् क्वाथ तैल द्विगुण मात्रामें छोड़ना चाहिये ॥ १५२-१५६ ॥

पञ्चमं माषतैलम्

माषस्यार्धाढकं दत्त्वा तुलार्धं दशमूलतः ॥१५७॥

पलानि छागमांसस्य त्रिंशद् द्रोणेऽम्भसः पचेत्।
पूतशीते कषाये च चतुर्थांशावतारिते ॥ १५८ ॥

प्रस्थं च तिलतैलस्य पयो दद्याच्चतुर्गुणम्।
आत्मगुप्तोरुबूकश्च शताह्वा लवणत्रयम् ॥ १५९ ॥

जीवनीयानि मञ्जिष्ठा चव्यचित्रककट्फलम्।
सव्योषं पिप्पलीमूलं रास्नामधुकसैन्धवम् ॥१६०॥

देवदार्वमृता कुष्ठं वाजिगन्धा वचा शटी।
एतैरक्षसमैः कल्कैः साधयेन्मृदुनाग्निना ॥ १६१ ॥

पक्षाघातर्दिते वाते बाधिर्ये हनुसंग्रहे।
कर्णनादे शिरःशूले तिमिरे च त्रिदोषजे ॥ १६२ ॥

पाणिपादशिरोग्रीवाभ्रमणे मन्दचङ्क्रमे।
कलायखञ्जे पाङ्गुल्ये गृध्रस्यामवबाहुके ॥१६३॥

पाने बस्तौ तथाभ्यङ्गे नस्ये कर्णाक्षिपूरणे।
तैलमेतत्प्रशंसन्ति सर्ववातरुजापहम् ॥ १६४ ॥

उड़द १॥ सेर ८ तोला, दशमूल २॥ सेर, बकरेका मांस १॥ सेर, सब २५ सेर ४८ तोला जलमें पकाना चाहिये। चतुर्थांश शेष रहने पर उतार छान १ प्रस्थ तिल तैल, दूध, ६ सेर ३२ तोला, कौंचके बीज, एरण्डकी छाल, सौंफ, तीनों नमक, जीवनीयगणकी औषधियां, मजीठ, चव्य, चीतकी जड़, कैफरा, त्रिकटु, पिपरामूल, रासन, मौरेठी, सेंधानमक, देवदारु, गुर्च, कूठ, अश्वगन्ध, बच, कचूर, प्रत्येक १ तोलाका कल्क छोड़कर मन्द आंचपर पकाना चाहिये। इस तैलको पिलाने, वस्ति देने, मालिश नस्य, कान तथा नेत्रोंमें डालनेके लिये प्रयोग करना चाहिये। यह पक्षाघात, अर्दित, बाधिर्य, ठोढ़ीकी जकड़ाहट, कर्णनाद, शिरःशूल, तिमिर, हाथ, पैर, शिर, गर्दनके घूमने तथा पैरोंकी शक्ति कम हो जाने, कलायखञ्ज, पांगुल्य, गृध्रसी, और अवबाहुक–को ही क्या समस्त वातरोगोंको नष्ट करता है * ॥ ॥ १५७-१६४ ॥

षष्ठं महामाषतैलम्

द्विपञ्चमूलीं निष्क्वाथ्य तैलात्षोडशभिर्गुणैः।
माषाढकं साधयित्वा तन्निर्यूहं चतुर्गुणम् ॥१६५॥

ग्राहयित्वा तु विपचेत्तैलप्रस्थं पयः समम्।
कल्कार्थं च समावाप्य भिषग्द्रव्याणि बुद्धिमान्॥१६६

अश्वगन्धां शटीं दारु बलां रास्नां प्रसारणीम्।
कुष्ठं परूषकं भार्ङ्गीं द्वे विदार्यौ पुनर्नवाम् ॥१६७॥

मातुलुङ्गफलाजाज्यौ रामठं शतपुष्पिकाम्।
शतावरीं गोक्षुरकं पिप्पलीमूलचित्रकम् ॥ १६८ ॥

जीवनीयगणं सर्वं संहृत्यैव ससैन्धवम्।
तत्साधु सिद्धं विज्ञाय माषातैलमिदं महत् ॥१६९॥

बस्त्यभ्यञ्जने पाननावनेषु प्रयोजयेत्।
पक्षाघाते हनुस्तम्भे अर्दिते सापतन्त्रके ॥ १७० ॥

अवबाहुकविश्वाच्योः खञ्जपङ्गुलयोरपि।
हनुमन्याग्रहे चैवमधिमन्थे च वातिके ॥ १७१ ॥

शुक्रक्षये कर्णनादे कर्णशूले च दारुणे।
कलायखञ्जशमने भैषज्यमिदमादिशेत् ॥ १७२ ॥

दशमूलाढकं द्रोणे निष्क्वाथ्य पादिको भवेत्।
क्वाथश्चतुर्गुणस्तैलान्माषक्वाथेऽप्ययं विधिः ॥१७३॥

दशमूल ३ सेर १६ तो०, जल २५ सेर ४८ तोले में पकाकर क्वाथ ६ सेर ३२ तो०, उड़द ४ प्रस्थका क्वाथ ६ सेर ३२ तोला, तैल १२८ तोला, दूध १२८ तोला, असगन्ध, कचूर, देवदारु, खरेटी, रासन, गन्धप्रसारणी, कूठ, फालसा-भार्ङ्गी, विदारीकन्द, क्षीरविदारी, पुनर्नवा, बिजौरे निम्बूका फल, सफेद, जीरा, भुनी हींग, सौंफ, शतावरी, गोखुरू, पिपरामूल, चीतकी जड़, जीवनीयगण, सेंधानमक सब समानभागका कल्क छोड़कर तैल पकाना चाहिये। यह "महामाषतैल"-बस्ति, मालिश, पान तथा नस्यके लिये प्रयुक्त करना चाहिये। यह पक्षाघात, हनुस्तम्भ, अर्दित, अपतन्त्रक, अवबाहुक, विश्वाची,

* इसी तैलके अनन्तर, त्रिशतीप्रसारिणी तैल दूसरी प्रतियोंमें लिखा है, पर माष तैलोंके मध्यमें प्रसारिणीतैल लिखना उचित नहीं समझा गया, किन्तु आगे त्रिशती, प्रसारिणी तैल दूसरा लिखेंगे। उसमें और इसमें पाठ भेदके सिवाय कोई दूसरा अन्तर नहीं है। हां, इसमें गुण अधिक लिख दिये गये हैं उतने उसमें नहीं लिखे। पर तैल एक ही होनेसे गुणोंमें अन्तर नहीं हो सकता, अतः वहींपर इसका भी पाठ देखिये ॥

खञ्जता, पांगुल्य, हनुग्रह मन्याग्रह, वातिक अधिमन्थ, शुक्रक्षय, कर्णनाद, कर्णशूल तथा कलायखञ्जको शान्त करता है। ऊपर जो "षोडशभिर्गुणैः" है उसका अर्थ यह है कि तैलसे १६ गुण जल छोड़कर क्वाथ बनाना चाहिये ॥ १६५-१७३ ॥

मज्जस्नेहः

ग्राम्यानूपौदकानां तु भिन्नास्थीनि पचेज्जले ।
तं स्नेहं दशमूलस्य कषायेण पुनः पचेत् ॥ १७४ ॥
जीवकर्षभकास्फोताविदारीकपिकच्छुभिः ।
वातघ्नैर्जीवनीयैश्च कल्कैर्द्विक्षीरभागिकम् ॥१७५॥
तत्सिद्धं नावनाभ्यङ्गात्तथा पानानुवासनात् ।
शिरःपार्श्वास्थिकोष्ठस्थं प्रणुदत्याशु मारुतम् १७६
ये स्युः प्रक्षीणमज्जानः क्षीणशुक्रौजसश्च ये ।
बलपुष्टिकरं तेषामेतत्स्यादमृतोपमम् ॥ १७७ ॥

ग्राम्य, आनूप तथा औदक प्राणियोंकी हड्डियोंको चूर्ण कर जलमें पकानाचाहिये, जितना इसका स्नेह निकले उससे चतुर्गुण दशमूलक्वाथ तथा द्विगुण दूध तथा जीवक, ऋषभक, आस्फोता (विष्णुक्रान्ता या हापरमाली) विदारीकन्द, कौंचके बीज, वातघ्न (देवदार्वादि) तथा जीवनीयगणकी ओषधियोंका कल्क स्नेहसे चतुर्थांश छोड़कर पकाना चाहिये । यह स्नेह नस्य, अनुवासन, बस्ति, मालिश तथा पीनेसे शिर, पसली, हड्डी तथा कोष्ठगत वायुको नष्ट करता है, जिनके मज्जा, ओज तथा शुक्र क्षीण हो गये हैं. उनके लिये यह स्नेह अमृत तुल्य बल तथा पुष्टि करनेवाला है ॥ १७४-१७७ ॥

महास्नेहः

प्रस्थःस्यात्त्रिफलायास्तु कुलत्थकुडवद्वयम् ।
कृष्णगन्धात्वगाढक्योः पृथक्पञ्चपलं भवेत्१७८॥
रास्नाचित्रकयोर्द्वे द्वे दशमूलं पलोन्मितम् ।
जलद्रोणे पचेत्पादशेषं प्रस्थोन्मितं पृथक् ॥ १७९ ॥
सुरारनालदध्यम्लसौवीरकतुषोदकम् ।
कोलदाडिमवृक्षाम्लरसं तैलं घृतं वसाम् ॥ १८० ॥
मज्जानं च पयश्चैव जीवनीयपलानि षट् ।
कल्कं दत्त्वा महास्नेहं सम्यगेनं विपाचयेत् १८१॥
शिरामज्जास्थिगे वाते सर्वाङ्गैकाङ्गरोगिषु ।
वेपनाक्षेपशूलेषु तमभ्यङ्गे प्रदापयेत् ॥ १८२ ॥

त्रिफला ६४ तोला, कुलथी ३२ तोला, सहिंजनेकी छाल २० तोला, अरहर २० तोला, रासन ८तोला, चीतकी जड ८ तोला, दशमूल प्रत्येक द्रव्य ४ तोला, जल १२ सेर ६४ तोला छोड़कर पकाना चाहिये, चतुर्थांश शेष रहनेपर उतार छानक्वाथ अलग रखना चाहिये । उसी क्वाथमें शराब ६४ तोला, काञ्जी ६४ तोला, दहीका तोड़ ६४ तोला, सौवीरक[1] तुषोदक, बेर, अनार तथा बिजौरे निम्बूका रस प्रत्येक द्रव ६४ तोला, तैल, घी, चर्बी, मज्जा तथा दूध प्रत्येक ६४ तोला तथा जीवनीयगणकी ओषधियां मिलित २४ तोलाका कल्क छोड़कर पकाना चाहिये । यह महास्नेह मालिशके लिये शिरा, मज्जा तथा अस्थिगत वात, सर्वाङ्गरोग, एकाङ्गरोग, कम्प, आक्षेप तथा शूलमें प्रयुक्त करना चाहिये ॥ १७८-१८२ ॥

कुब्जप्रसारणीतैलम्

प्रसारणीशतं क्षुण्णं पचेत्तोयार्मणे शुभे ।
पादशिष्टे समं तैलं दधि दद्यात्सकाञ्जिकम् १८३॥
द्विगुणं च पयो दत्त्वा कल्कान्द्विपलिकांस्तथा ।
चित्रकं पिप्पलीमूलं मधुकं सैन्धवं वचाम् ॥१८४॥
शतपुष्पां देवदारु रास्ना वारणपिप्पलीम् ।
प्रसारण्याश्च मूलानि मांसीं भल्लातकानि च ॥१८५॥
पचेन्मृद्वग्निना तैलं वातश्लेष्मामयापहम् ।
अशीतिं नरनारीणां वातरोगानपोहति ॥ १८६ ॥
कुब्जं स्तिमितपंगुत्वं गृध्रसीं खुडकार्दितम् ।
हनुपृष्ठशिरोग्रीवास्तम्भं चापि नियच्छति ॥१८७॥

गन्धप्रसारिणी ५ सेर जल १ द्रोणमें पकाना चाहिये । चतुर्थांश शेष रहनेपर उतार छान क्वाथके समान तैल तथा उतना ही दही और उतना ही काञ्जी और तैलसे दूना दूध तथा चीतकी जड़, पिपरामूल, मौरेठी, सेंधानमक, वच, सौंफ, देवदारु, रासन, गजपीपल, गन्धप्रसारणीकी जड़, जटामांसी, भिलावां प्रत्येक ८ तोलाका कल्क छोड़कर मन्दाग्निसे पकाना चाहिये । यह तैल वातकफके रोगोंको जीतता तथा अस्सी प्रकारके पुरुष तथा स्त्रियोंके वातरोगों तथा कुब्जता, जकड़ाहट पंगुता, गृध्रसी, वातकंटक, हनु, पृष्ठ, शिर व गर्दनकी जकड़ाहट इत्यादिको नष्ट करता है ॥ १८३-१८७ ॥

त्रिशतीप्रसारणीतैलम्

प्रसारण्यास्तुलामश्वगन्धाया दशमूलतः ।
तुलां तुलां पृथग्वारि द्रोणे पादांशशेषिते ॥ १९९ ॥

---

[1] सौवीर तथा तुषोदककी निर्माणविधि-"सौवीरस्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतः । गोधूमैरपि सौवीरमाचार्याःकेचिद्चिरे" अर्थात् कच्चे या पक्व भूसीरहित यवोंको अष्टगुण जल पूरित घड़ेमें बन्द कर १५ दिनतक रख छानकर काममें लाना चाहिये। कुछ लोग गेहुओंसे भी सौवीरक बनाना कहते हैं। "तुषाम्बु संधितं ज्ञेयमामैर्विदलितैर्यवैः । तुषोदकं तुषजलं तदेव परिकीर्तितम् ॥" अथवा-"भृष्टान्माषतुषान्सिद्धान्यवांस्तु चूर्णसंयुतान्। आभृतानम्भसा तद्वज्जातं तच्च तुषोदकम्। तुषोदकं यवैरामैः सतुषैः शकलीकृतैः ॥"

तैलाढकं चतुःक्षीरं दधितुल्यं द्विकाञ्जिकम् ।
द्विपलैर्ग्रन्थिकक्षारप्रसारण्यक्षसैन्धवैः ॥ १८९ ॥

समञ्जिष्ठाग्नियष्ट्याह्वैः पलिकैर्जीवनीयकैः ।
शुण्ठ्याः पञ्च पलं दत्त्वा त्रिंशद्भल्लातकानि च१९०

पचेद्बस्त्यादिना वातं हन्ति सन्धिशिरास्थितम् ।
पुंस्त्वोत्साहस्मृतिप्रज्ञाबलवर्णाग्निवृद्धये ॥ १९१ ॥

प्रसारणीयं त्रिशती अक्षं सौवर्चलं त्विह ।

गंधप्रसारणी ५ सेर, असगंध ५ सेर, दशमूल ५ सेर, प्रत्येक अलग अलग २५ सेर ४८ तोला जलमें मिला चतुर्थांश शेष क्वाथ बनाना चाहिये, फिर क्वाथमें तैल ६ सेर ३२ तोला, दूध २५ सेर ४८ तोला, दही ६ सेर ३२ तोला, काञ्जी १२ सेर ४८ तोला तथा पीपरामूल, यवाखार, गन्धप्रसारणी, सोवर्चलनमक, सेंधानकमक, मजीठ, चीतकी जड़, मौरेठी प्रत्येक ८ तोला तथा जीवनीयगणकी प्रत्येक औषधियां ४ तोला, सोंठ २० तोला, भिलावां ३० गिनतीके छोड़कर पकाना चाहिये । यह तैल बस्ति आदिद्वारा संधि तथा शिराओंमें स्थित वायुको नष्ट करता है । यह "उत्साह, स्मृति, बुद्धि, बल, वर्ण तथा अग्निकी वृद्धि करता है । यह "त्रिशती-प्रसारणी" तैल है । इसमें "अक्ष" शब्दका अर्थ सौवर्चल नमक है ॥ १८८-१९१ ॥

सप्तशतीकं प्रसारणीतैलम्

समूलपत्रामुत्पाट्य शरत्काले प्रसारणीम् ॥१९२॥
शतं ग्राह्यं सहचराच्छतावर्याः शतं तथा ।
बलात्मगुप्ताश्वगन्धाकेतकीनां शतं शतम् ॥ १९३॥
पचेच्चतुर्गुणे तोये द्रवैस्तैलाढकं भिषक् ।
मस्तु मांसरसं चुक्रं पयश्चाढकमाढकम् ॥ २९४ ॥
दध्याढकसमायुक्तं पाचयेन्मृदुनाग्निना ।
द्रव्याणां च प्रदातव्या मात्रा चार्धपलांशिका १९५
तगरं मदनं कुष्ठं केशरं मुस्तकं त्वचम् ।
रास्ना सैन्धवपिप्पल्यौ मांसी मञ्जिष्ठयष्टिका १९६
तथा मेदा महामेदा जीवकर्षभकौ पुनः ।
शतपुष्पा व्याघ्रनखं शुण्ठी देवाह्वमेव च ॥१९७॥
काकोली क्षीरकाकोली वचा भल्लातकं तथा ।
पेषयित्वा समानेतान्साधनीया प्रसारणी ॥१९८॥

नातिपक्वं न हीनं च सिद्धं पूतं निधापयेत् ।
यत्र यत्र प्रदातव्या तन्मे निगदतः शृणु ॥ १९९ ॥

कुब्जानामथ पङ्गूनां वामनानां तथैव च ।
यस्य शुष्यति चैकाङ्ग ये च भग्नास्थिसन्धयः २००

वातशोणितदुष्टानां वातोपहतचेतसाम् ।
स्त्रीषु प्रक्षीणशुक्राणां वाजीकरणमुत्तमम् ॥२०१॥

बस्तौ पाने तथाभ्यङ्गे नस्ये चैव प्रदापयेत् ।
प्रयुक्तं शमयत्याशु वातजान्विविधान्गदान् २०२॥

शरदृतुमें मूल पत्ते सहित उखाड़ी गयी प्रसारणी ५ सेर, पियावांसा (कटसैला)५ सेर, शतावरी ५ सेर, खरेटी, कौंच, असगन्ध तथा केवड़ा प्रत्येकका पञ्चाङ्ग ५ सेर सबसे चतुर्गुण जल मिलाकर क्वाथ बनाना चाहिये । चतुर्थांश रहनेपर उतार छानकर तैल ८ सेर ३२ तोला, दहीका तोड़ मांसरस, चूका तथा दूध प्रत्येक एक आढ़क तथा दही एक आढक मिला मृदु आंचसे पकाना चाहिये । तथा तगर, मैनफल, कूठ, नागकेशरं, नागरमोथा, दालचीनी, रासन, सेंधानमक, छोटी पीपल, जटामांसी, मजीठ, मौरेठी, मेदा, महामेदा, जीवक, ऋषभक, सौंफ, नख, सोंठ, देवदारु, काकोली, क्षीरकाकोली, वच, भिलावां प्रत्येक २ तोलाका कल्क छोड़कर मन्द आंचसे यह"प्रसारणीतैल" सिद्ध करना चाहिये । यह न जलने पावे न मृदु रहे अर्थात् मध्यपाक करना चाहिये । सिद्ध हो जानेपर

---

१ यही तैल दूसरी प्रतियोंमें इस प्रकार पाठभेदसे लिखा है—"समूलपत्रशाखां च जातसारां प्रसारणीम् । कुट्टयित्वा पलशतं दशमूलशतं तथा । अश्वगन्धापालशतं कटाहे समधिक्षिपेत् । वारिद्रोणे पृथक्पक्त्वा पादशेषावतारितम् ॥ कषायाः समामात्रास्तु तैलपात्रं प्रदापयेत् । दध्नस्तथाढकं दत्त्वा द्विगुणं नैव काञ्जिकम् ॥ चतुर्गुणेन पयसा जीवनीयैः पलोन्मितैः । श्रृङ्गवेरपलान्पञ्च त्रिंशद्भल्लातकानि च द्वे पले पिप्पलीमूलाचित्रकस्य पलद्वयम् । यवक्षारपले द्वे च मधुकस्य पलद्वयम् ॥ प्रसारणी पले द्वे च सैन्धवस्य पलद्वयम् । सौवर्चललवणे द्वे च मञ्जिष्ठायाः पलद्वयम् ॥ सर्वाण्येतानि संस्कृत्य शनैर्मृद्वग्निना पचेत् । एतदभ्यञ्जनं श्रेष्ठं बस्तिकर्म निरूहणे ॥ पाने नस्ये च दातव्यं न क्वचित्प्रतिहन्यते । अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान् ॥ विंशतिं श्लैष्मिकांश्चैव सर्वानेतान्व्यपोहति । गृध्रसीमस्थिभंगं च मन्दाग्नित्वमरोचकम् । अपस्मारमथोन्मादं विभ्रमं मन्दकेगामिताम् । त्वग्गताश्चैव ये वाताः शिरासन्धिगताश्च ये॥जानुसन्धिगताश्चैव पादपृष्ठगतास्तथा । अश्वो वाताच्च संभग्नो गजो वा यदि वा नरः॥प्रसारयति यस्माद्धि तस्मादेषा प्रसारणी।इन्द्रियाणां प्रजननी वृद्धानां च रसायनी॥एतेनांधकवृष्णीनां कृतंपुंसवनं महत्।प्रसारणीतैलमिदं बलवर्णाग्निवर्धनम्॥अपनयति वलीपलितमुत्पाटयति पक्षाघातम् । वातस्तंभं सर्वाङ्गगतं वायुगुल्मं च नाशयति॥एतदुपसेवमानःप्रसन्नवर्णेन्द्रियो भवति॥"

इसकी निर्माणपद्धति उपरोक्त तैलसे भिन्न नहीं अर्थात् यह और वह तैल एक ही है । अतः उसीके अनुसार इसका भी अर्थ समझना । पर इसमें गुण अधिक लिखे गये हैं। उन्हें समझ लेना चाहिये ॥

उतार छानकर रखना चाहिये । इसे कुबड़े, पङ्गु तथा वामनोंको देना चाहिये, जिनका एकांग सूखता है, जिनकी अस्थियाँ तथा जोड़ टूट गये हैं, वातरक्त, वातोन्माद तथा क्षीणशुक्रवालोंको अत्यन्त हितकर है, बस्ति, पान मालिश, तथा नस्यमें इसका प्रयोग करना चाहिये । प्रयोग करनेसे यह वातज अनेक रोगोंको नष्ट करता है । (इन प्रसारणी तैलोंको यद्यपि एक ही बड़े पात्रमें पकाना लिखा है और उत्तम भी यही है, पर इतने बड़े पात्रोंका यदि प्रबंध न हो सके तो एक एक द्रवके साथ कई बारमें मंद आंचसे पका लेना चाहिये ॥ १९२–१२०२ ॥

एकादशशतिकं प्रसारणीतैलम्

शाखामूलदलैः प्रसारणितुलास्तिस्रः कुरण्टात्तुले ।
छिन्नायाश्च तुले तुले रुबुकतो रास्नाशिरीषात्तुलाम् ।
देवाह्वाच्च सकेतकाद् घटशते निष्क्वाथ्य कुंभांशिके
तोये तैलघटं तुषाम्बुकलशौ दत्त्वाढकं मस्तुनः२०३

शुक्ताच्छागरसादथेक्षुरसतः क्षीराच्च दत्त्वाढकं
स्पृक्काकर्कटजीवकाद्यविकसा(का)कोलिकाकच्छुरा ।
सूक्ष्मैलाघनसारकुन्दसरलाकाश्मीरमांसीनखैः ।
कालीयोत्पलपद्मकाह्वयनिशाकक्कोलकग्रन्थिकैः ॥

चाम्पेयाभयचोचपूगकटुकाजातीफलाभीरुभि ।
श्रीवासामरदारुचन्दनवचाशैलेयसिन्धूद्भवैः
तैलाम्भोदकटम्भरांघ्रिनलिकावृश्चीकचचोरकैः
कस्तूरीदशमूलकेतकनतध्यामाश्वगन्धाम्बुभिः २०५

कौन्तीताक्ष्र्यजलकीफललघुश्यामाशताह्वामयै-
र्भल्लातत्रिफलाब्जकेशरमहाश्यामालवङ्गान्वितैः ।
सत्र्योषैस्त्रिफलैर्महीयसि पचेन्मन्देन पात्रेऽग्निना
पानाभ्यंजनबस्तिनस्यविधिना तन्मारुतं नाशयेत्॥
सर्वाङ्गार्धगतं तथावयवगं सन्ध्यस्थिमज्जान्वितं
श्लेष्मोत्थानथ पैत्तिकांश्च शमयेन्नानाविधानामयान्
धातूनृंहयति स्थिरं च कुरुते पुंसां नवं यौवनं
वृद्धस्यापि बलं करोति सुमहद्वन्ध्यासु गर्भप्रदम् ॥
पीत्वा तैलमिदं जरत्यपि सुतं सूतेऽमुना भूरुहाः
सिक्ताः शौषमुपागताश्च फलिनः स्निग्धा भवन्ति स्थिराः
नश्यन्त्यामानिलजाः सर्वे रोगाः सुकष्टास्तु ॥ ४१ ॥
विश्वाचीप्रतितूनीतूनीहृद्रोगाश्च गृध्रसी चोग्रा ।
कटिबस्तिगुदस्फुटनं स्फुटनं चैवास्थिजंघयोस्तीव्रम् ॥
श्वयथुस्तथाङ्गसन्धिषु ये चान्येऽप्यामवातसम्भूताः ।
सर्वे प्रयान्ति नाशं तम इव सूर्यांशुविध्वस्तम् ॥ ४३ ॥

अजमोद, काली मिर्च, छोटी पीपल, वायविडङ्ग, देवदारु, चीतकी जड़, सौंफ, सेंधानमक, पिपरामूल, प्रत्येक एक एक पल, सोंठ, १० पल, विधारा १० पल, तथा हरड़ ५ पल सबका एकमें चूर्ण करना चाहिये।फिर समान गुड़ मिला गोली बना अथवा चूर्ण ही गरम जलके साथ खानेसे आमवातके समस्त रोग, तूनी, प्रतितूनी, विश्वाची, हृद्रोग, गृध्रसी कमर, बस्ति व गुदाकी पीड़ा तथा हड्डियों व पिंडलियोंकी पीड़ा,

शरीरकी सन्धियोंका शोथ तथा अन्य समस्त आम या वातसे उत्पन्न होनेवाले रोग सूर्यकी किरणोंसे नष्ट हुए अन्धकारके समान अदृश्य हो जाते हैं ॥ ३९–४३ ॥

नागरघृतम्

नागरक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत् ।
चतुर्गुणेन तेनाथ केवलेनोदकेन वा ॥ ४४ ॥
वातश्लेष्मप्रशनमग्निसंदीपनं परम् ।
नागरं घृतमित्युक्तं कट्यामशूलनाशनम् ॥ ४५ ॥

चतुर्गुण सोंठका क्वाथ तथा चतुर्थांश उसीका कल्क अथवा केवल कल्क और चतुर्गुण जल मिलाकर घी १ प्रस्थ पकाना चाहिये।यह घी वात, कफको शान्त, अग्निको दीप्त तथा कमर आदिमें होनेवाले शूलको नष्ट करता है ॥ ४४ ॥ ४५ ॥

अमृताघृतम्

अमृतायाः कषायेण कल्केन च महौषधात् ।
मृद्वग्निना घृतप्रस्थं वातरक्तहरं परम् ॥ ४६ ॥
आमवाताढ्यवातादीन् क्रिमिदुष्टव्रणानपि ।
अर्शांसि गुल्मशूलं च नाशयत्याशु योजितम्॥४७॥

गुर्चके काढ़े और सोंठके कल्कको छोड़कर मन्द आंचसे पकाया गया १ प्रस्थ घी वातरक्त, आमवात, ऊरुस्तम्भ, क्रिमिरोग, दुष्टव्रण, अर्श तथा गुल्म, व शूलको नष्ट करता है ॥ ४६ ॥ ४७ ॥

हिंग्वादिघृतम्

हिंगुत्रिकटुकं चव्यं माणिमन्थं तथैव च ।
कल्कान्कृत्वा च पलिकान्घृतप्रस्थं विपाचयेत्॥४८
आरनालाढकं दत्त्वा तत्सर्पिर्जठराहम् ।
शूलं विबन्धमानाहमामवातं कटीग्रहम् ।
नाशयेद्ग्रहणीदोषं मन्दाग्नेर्दीपनं परम् ॥ ४९ ॥

हींग, सोंठ, मिर्च, पीपल, चव्य, सेंधानमक, प्रत्येक ४ तोलाका कल्क, घी १ प्रस्थ (१ सेर ९ छ० ३ तोला) तथा काञ्जी ६ सेर ३२ तोला मिलाकर पकाया गया घृत सेवन करनेसे उदररोग, शूल, विबन्ध, अफारा, आमवात, कमरका दर्द तथा ग्रहणीरोग नष्ट होते हैं और अग्नि दीप्त होता है ॥ ४८ ॥ ४९ ॥

शुण्ठीघृतानि

पुष्ट्यर्थं पयसा साध्यं दध्ना विण्मूत्रसंग्रहे ।
दीपनार्थं मतिमता मस्तुना च प्रकीर्तितम् ॥५०॥
सर्पिर्नागरकल्केन सौवीरकचतुर्गुणम् ।
सिद्धमग्निकरं श्रेष्ठमामवातहरं परम् ॥ ५१ ॥

(१.) पुष्टिके लिये दूधके साथ (२) मल मूत्रकी रुकावटके लिये दहीके साथ तथा (३) अग्निदीपनके लिये दहीके तोड़के साथ सोंठका कल्क छोड़कर घी सिद्ध करना चाहिये । इसी प्रकार (४) सोंठका कल्क और चतुर्गुण सौवीरक(काञ्जीभेद) मिलाकर पकाया गया घृत अग्निको दीप्त करता तथा आमवातको नष्ट करता है ॥ ५० ॥ ५१ ॥

रसोनपिण्डः

रसोनस्य पलशतं तिलस्य कुडवं तथा ।
हिंगु त्रिकटुकं क्षारौ पञ्चैव लवणानि च ॥ ५२ ॥
शतपुष्पा तथा कुष्ठं पिप्पलीमूलचित्रकौ ।
अजमोदा यमानी च धान्यकं चापि बुद्धिमान् ५३
प्रत्येकं तु पलं चैषां सूक्ष्मचूर्णानि कारयेत् ।
घृतभाण्डे दृढे चैतत्स्थापयेद्दिनषोडश ॥ ५४ ॥
प्रक्षिप्य तैलमानीं च प्रस्थार्धं काञ्जिकस्य च ।
खादेत्कर्षप्रमाणं तु तोयं मद्यं पिबेदनु ॥ ५५ ॥
आमवाते तथा वाते सर्वाङ्गैकाङ्गसंश्रिते ।
अपस्मारेऽनले मन्दे कासे श्वासे गरेषु च ।
सोन्मादवातभग्ने च शूले जन्तुषु शस्यते ॥ ५६ ॥

शुद्ध लहसुन ५ सेर, तिल १६ तोला, भुनी हींग, सोंठ मिर्च, छोटी पीपल, यवाखार, सज्जीखार, पांच नमक, सौंफ, कूठ, पिपरामूल, चीतकी जड़, अजमोदा अजवाइन तथा धनियां प्रत्येक ४ तोला सबका महीन चूर्ण कर मजबूत घीके बर्तनमें १६ दिनतक तिलतैल ६४ तोला, काञ्जी ४ तोला मिलाकर रखना चाहिये । फिर १ तोलाकी मात्रासे खाना चाहिये, ऊपरसे जल या मद्य पीना चाहिये । यह आमवात सर्वाङ्ग तथा एकांग-गत वात, अपस्मार, मन्दाग्नि, कास, श्वास कृत्रिमविष, उन्माद, वातभग्न, शूल, तथा क्रिमियोंको नष्ट करता है ॥ ५२–५६ ॥

प्रसारणीरसोनपिण्डः

प्रसारण्याढकक्वाथे प्रस्थो गुडरसोनतः ।
पक्वः पञ्चोषणरजः पादः स्यादामवातहा ॥ ५७ ॥

गन्धप्रसारणीका क्वाथ १ आढ़क, गुड़ व लहसुन मिलाकर ६४ तोला तथा पञ्चकोमलका चूर्ण १६ तोला मिलाकर पकाया गया लेह आमवातको नष्ट करता है ॥ ५७ ॥

रसोनसुराः

वल्कलायाः सुरायास्तु सुपक्वायाः शतं घटे ।
ततोऽर्धेन रसोनं तु संशुद्धं कुट्टितं क्षिपेत् ॥ ५८ ॥

“१ बहुलायाः” इति वा पाठः ।

पिप्पली पिप्पलीमूलमजाजी कुष्ठचित्रकम् ।
नागरं मरिचं चव्यं चूर्णितं चाक्षसम्मितम् ॥५९॥
सप्ताहात्परतः पेया वातरोगामनाशिनी ।
क्रिमिकुष्ठक्षयानाहगुल्मार्शःप्लीहमेहनुत् ॥
अग्निसन्दीपनी चैव पाण्डुरोगविनाशिनी ॥६०॥

एक घड़ेमें ५ सेर वल्कली नामक शराब ॥ २ ॥ सेर लहसुन कुटा हुआ तथा छोटी पीपल, पिपरामूल, सफेद जीरा, कूठ, चीतकी जड़, सोंठ, मिर्च व चव्य प्रत्येक एक एक तोला छोड़कर ७ दिन रखनेके अनन्तर पीना चाहिये। यह वातरोग, आमवात, क्रिमि, कुष्ठ, क्षय, अफारा, गुल्म, अर्श, प्लीहा तथा प्रमेहको नष्ट करती, अग्निको दीप्त करती तथा पांडुरोगको विनष्ट करती है ॥ ५८-६० ॥

शिण्डाकी

सिद्धार्थकखलीप्रस्थं सुधौतं निस्तुषं जले ।
मण्डप्रस्थं विनिक्षिप्य स्थापयेद्दिवसत्रयम् ॥६१॥
धान्यराशौ ततो दद्यात्सञ्चूर्ण्य पलिकानि च ।
अलम्बुषा गोक्षुरकं शतपुष्पीपुनर्नवे ॥ ६२ ॥
प्रसारणी वरणत्वक् शुण्ठी मदनमेव च ।
सम्यक्पाकं तु विज्ञाय सिद्धा तण्डुलमिश्रिता ६३
भृष्टा सर्षपतैलेन हिंगुसैन्धवसंयुता ।
भक्षिता लवणोपेता जयेदामं महारुजम् ॥६४॥
एकजं द्वन्द्वजं साध्यं सान्निपातिकमेव च ।
कट्यूरुवातमानाहजानुजं त्रिकमागतम् ।
उदावर्तहरी पेया बलवर्णाग्निकारिणी ॥ ६५ ॥

सफेद सरसोंकी खली ६४ तोला पानीमें धो भुसी अलग कर पानीसहित खलीमें मण्ड १२८ तोला छोड़कर ३ दिनतक धान्यराशिमें रखना चाहिये। फिर निकालकर मुण्डी, गोखरू, सौंफ, पुनर्नवा, प्रसारणीकी वरुणाकी छाल, सोंठ,तथा मैनफल, प्रत्येकका ४ तोला चूर्ण मिलाना चाहिये।फिर पके भातके साथ सरसोंका तैल, हींग, सेंधानमक मिलाकर खानेसे आमवात, एकज, द्वन्द्वज तथा सन्निपातज रोग, कमरका दर्द, जंघाओंका दर्द, अफारा, घुटनोंका दर्द, त्रिकशूल तथा उदावर्त रोग नष्ट होता और बल व वर्ण उत्तम होता है ॥ ६१-६५ ॥

सिध्मला

त्वगादिहीनाः संशुष्काः प्रत्यग्राः सकुलादयः ।
श्लक्ष्णचूर्णीकृत तेषां शीते पलशतत्रयम् ॥ ६६ ॥
शतेन कटुतैलस्य व्योषरामठधान्यकैः ।
क्रिमिघ्नदीप्यकनिशाचविकाग्रन्थिकार्द्रकैः ।
जीरकद्वयवृश्चीरसुरसार्जकशिग्रुकैः ॥ ६७ ॥
दशमूलात्मगुप्ताभ्यां मार्कवैर्लवणैस्त्रिभिः ।
चूर्णितैः पलिकैः सार्धमारनालपरिप्लुतैः ॥ ६८ ॥
विन्यसेत्स्नेहपात्रे च धान्यराशौ पुनर्न्यसेत्,
सप्तरात्रात्समुद्धृत्य पानभक्षणभोजनैः ॥ ६९ ॥
सिध्मलेयं प्रयोक्तव्या सामे वाते विशेषतः ।
भग्नरुग्णाभ्युपहताः कम्पिनः पीठसर्पिणः ॥७०॥
गृध्रसीमग्निसादं च शूलगुल्मोदराणि च ।
बलीपलितखालित्यं हत्वा स्युरमलेन्द्रियाः ॥७१॥

शीत कालमें त्वगादि रहित नवीन सूखी मछली १२०० तोला चूर्ण की हुई, कड़ुआ तैल ४०० तोला, सोंठ, मिर्च, पीपल, धनियां, भुनी हींग, बायविड़ंग, अजवाइन, हल्दी, चव्य, पिपरामूल, अदरख, सफेद जीरा, स्याह जीरा, पुनर्नवा, तुलसी, देवना, सहिंजन, दशमूल कौंचके बीज, भांगरा तथा तीनों नमक प्रत्येक ४ तोला मिला काञ्जीसे भर देना फिर स्नेह पात्रमें भरकर अन्नके ढेरके अन्दर सात दिनतक रखना चाहिये। फिर निकाल भोजन तथा भक्षण आदिसे अथवा कवल इसका प्रयोग करना चाहिये।यह "सिध्मला"-आमवातमें विशेष लाभ करती है। तथा टूटे हुए, दर्दयुक्त, चोटवालोंको कम्पनेवालों, पौलेपर चलनेवालोंको तथा गृधसी, अग्निमान्द्य, शूल, गुल्म और उदररोगवालोंको लाभ करती है।इसके सेवनसे पुरुष झुर्रियां, बालोंकी सफेदी और इन्द्रलुप्त आदिसे रहित होकर शुद्धेन्द्रिय होते हैं ॥ ६६-७१ ॥

आमवाते वर्ज्यानि

दधिमत्स्यगुडक्षीरपोतकीमाषपिष्टकम् ।
वर्जयेदामवातार्तो गुर्वभिष्यन्दकारि च ॥७२॥

दही, मछली, गुड़, दूध, पोय, उड़दकी पिट्ठी तथा भारी और अभिष्यन्दी पदार्थ आमवातवालेको त्याग देना चाहिये ॥ ७२ ॥

इत्यामवाताधिकारः समाप्तः

अथ शूलाधिकारः

शूले वमनलंघनाद्युपायाः

वमनं लंघनं स्वेदः पाचनं फलवर्तयः ।
क्षारचूर्णानि गुडिकाः शस्यन्ते शूलशान्तये ॥ १ ॥
पुंसः शूलाभिपन्नस्य स्वेद एव सुखावहः ।
पायसैः कृशरैः पिष्टैः स्निग्धैर्वापि सितोत्करैः ॥२

वमन, लंघन, स्वेदन, पाचन, फलवर्ति, क्षार, चूर्ण तथा क्षारादि युक्त गोलियां शूलको शान्त करती हैं । विशेषतः शूल वालेको स्वेदन ही सुखदायक होता है । वह खीर, खिचड़ी स्निग्ध पिट्ठी अथवा मिश्रीयुक्त हलवेसे करना चाहिये॥१॥२॥

वातशूलचिकित्सा

वातात्मकं हन्त्यचिरेण शूलं
स्नेहेन युक्तस्तु कुलत्थयूषः ।
ससैन्धवो व्योषयुत[1] सलावः
सहिंगुसौवर्चलदाडिमाढ्यः ॥ ३ ॥

कुलथी व बटेरका मांस दोनों मिलाकर (१ पल) चार तोला, जल ६४ तोला मिलाकर पकाना चाहिये । चतुर्थांश शेष रहनेपर उतार मलकर कपड़ेसे छान ले । फिर इस यूषको हींग, व घीमें तैल, सेंधानमक, त्रिकटु, काला नमक, अनारका रस डालकर पीनेसे वातजन्य शूल शान्त होता है ।"यूषविधि" यही शिवदासजीने लिखी है ॥ ३ ॥

बलादिक्वाथः

बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः ।
सहिंगुलवणं पीतं सद्यो वातरुजापहम् ॥ ४ ॥

खरेटी, पुनर्नवाकी जड़, एरण्डकी छाल, छोटी कटेरी, बड़ी कटेरी तथा गोखुरूका क्वाथ, भुनी हींग व सौवर्चल नमक मिलाकर पीना चाहिये । इससे तत्काल ही वातजशूल शान्त होता है ॥ ४ ॥

हिंग्वादिचूर्णम्

शूली विबन्धकोष्ठोऽद्भिरुष्णाभिश्चूर्णिताः पिबेत् ।
हिंगुप्रतिविषाव्योषवचासौवर्चलाभयाः ॥५ ॥

भुनी हींग, अतीस, त्रिकटु, वच, काला नमक, बड़ी हर्रका छिल्का चूर्ण कर गरम जलके साथ पीनेसे शूल तथा विबन्ध नष्ट होता है ॥ ५ ॥

तुम्बुर्वादिचूर्णम्

तुम्बुरूण्यभया हिंगु पौष्करं लवणत्रयम् ।
पिबेद्यवाम्बुना वातशूलगुल्मापतन्त्रकी ॥ ६ ॥

तुम्बरू, बड़ी हर्रका छिल्का, भुनी हींग, पोहकरमूल, सेंधानमक, कालानमक तथा समुद्र नमकका चूर्ण, यवक्षार जल अथवा यवके क्वाथके साथ पीना चाहिये ॥ ६ ॥

श्यामादिकल्कः

श्यामा विडं शिग्रुफलानि पथ्या
विडङ्गकम्पिल्लकमश्वमूत्री ।
कल्कं समं मद्ययुतं च पीत्वा
शूलं निहन्यादनिलात्मकं तु ॥ ७ ॥

निशोथ, बिड़लवण, सहिंजनके बीज, हर्र, कबीला, तथा शल्लकी (साखोभेद) सब समान भाग ले कल्क कर शराबके साथ पीनेसे वातात्मक शूल नष्ट होता है ॥ ७ ॥

यमान्यादिचूर्णम्

यमानीहिंगुसिन्धूत्थक्षारसौवर्चलाभयाः ।
सुरामण्डेन पातव्या वातशूलनिषूदनाः ॥ ८ ॥

अजवाइन, भुनी हींग, सेंधानमक, यवक्षार, काला नमक तथा बड़ी हर्रका छिल्का सब समान भाग ले चूर्ण कर शराबके स्वच्छभागके साथ पीनेसे वातजशूल नष्ट होता है ॥ ८ ॥

विविधाः योगाः

विश्वमेरण्डजं मूलं क्वाथयित्वा जलं पिबेत् ।
हिंगुसौवर्चलोपेतं सद्यः शूलनिवारणम् ॥ ९ ॥
हिंगुपुष्करमूलाभ्यां हिंगुसौवर्चलेन वा ।
विश्वैरण्डयवक्वाथः सद्यः शूलनिवारणः ।
तद्वद्वुयवक्वाथो हिंगुसौवर्चलान्वितः ॥ १० ॥

सोंठ, व एरण्डकी जड़की छालका क्वाथ बनाकर भुनी हींग व काला नमक मिलाकर पीनेसे तत्काल शूल शान्त होता है । इसी प्रकार सोंठ, एरण्डकी छाल व यवका क्वाथ, भुनी हींग व पोहकरमूलके चूर्णके साथ अथवा भुनी हींग व काले नमकके साथ पीनेसे शूल नष्ट होता है । इसी प्रकार एरण्डकी छाल व यवका क्वाथ, भुनी हींग व काले नमकके साथ पीनेसे शूल नष्ट होता है ॥ ९ ॥ १० ॥

द्वितीयं हिंग्वादिचूर्णम्

हिंग्वम्लकृष्णालवणं यमानी-
क्षाराभयासैन्धवतुल्यभागम् ।
चूर्णं पिबेद्वारुणमण्डमिश्रं
शूले प्रवृद्धेऽनिलजे शिवाय ॥ ११ ॥

भुनी हींग, अम्लवेत, छोटी पीपल, सेंधानमक अजवाइन, यवक्षार, बड़ी हर्र तथा काला नमक समान भाग ले चूर्ण कर ताड़ीके स्वच्छ भागके साथ पीनेसे वातजन्य शूलकी शांति होती है * ॥ ११ ॥

---

[1] श्यामाऽत्र वृद्धदारकः इति शिवदासः ॥ ७ ॥

* नारिकेलखण्डः। "सुपक्वनारिकेलस्य शस्यं पलचतुष्टयम्। पिष्ट्वा घृतपले भृष्ट्वा क्षिपेत्खण्डचतुष्पलम् ॥ नारिकेलस्य च प्रस्थे किञ्चिच्छस्यवतो जले। धान्याकं पिप्पली मुस्तं द्विजीरं वंशलोचनाम् ॥ शाणमानं चतुर्जातं चूर्णं शीते क्षिपेद् बुधः।—

सौवर्चलादिगुटिका

सौवर्चलाम्लिकाजाजीमरिचैर्द्विगुणोत्तरैः ।
मातुलुङ्गरसैः पिष्ट्वा गुडिकानिलशूलनुत् ॥ १२ ॥

काला नमक १ भाग, इमली २ भाग, जीरा सफेद ४ भाग, काली मिर्च ८ भाग ले चूर्णकर बिजौरे निंबूके रसमें गोली बना लेनी चाहिये । यह वातशूलको नष्ट करती है ॥ १२ ॥

हिंग्वादिगुटिका

हिंग्वम्लवेतसव्योषयमानीलवणत्रिकैः ।
बीजपूररसोपेतैर्गुडिका वातशूलनुत् ॥ १३ ॥

भुनी हींग, अम्लवेत, सोंठ, मिर्च, छोटी पीपल, अजवाइन, तीनों, नमक, समान भाग ले चूर्ण कर बिजौरे निम्बूके रसमें गोली बनाकर सेवन करनेसे वातशूल नष्ट होता है ॥ १३ ॥

बीजपूरकमूलयोगः

बीजपूरकमूलं च घृतेन सह पाययेत् ।
जयेद्वातभवं शूलं कर्षमेकं प्रमाणतः ॥ १४ ॥

१ तोला बिजौरे निम्बूकी जड़का चूर्ण अथवा कल्क घीके साथ पिलानेसे वातशूल नष्ट होता है ॥ १४ ॥

स्वेदनप्रयोगाः

बिल्वमूलतिलैरण्डं पिष्ट्वा चाम्लतुषाम्भसा ।
गुडिकां भ्रामयेदुष्णां वातशूलविनाशिनीम् ॥ १५ ॥

तिलैश्च गुडिकां कृत्वा भ्रामयेज्जठरोपरि ।
गुडिका शमयत्येषा शूलं चैवातिदुःसहम् ॥ १६ ॥
नाभिलेपाज्जयेच्छूलं मदनः काञ्जिकान्वितः ।
जीवन्तीमूलकल्को वा सतैलः पार्श्वशूलनुत् ॥ १७ ॥

बेलकी छाल, तिल तथा एरण्डकी छालको काञ्जीके साथ पीस गरम कर गुनगुनी गुनगुनी गोली पेटपर फिरानेसे शूल नष्ट होता है । इसी प्रकार काले तिलको पीस गोली बना गरम कर पेटपर फिरानेसे वातजन्य शूल नष्ट होता है । इसी प्रकार मैना फलका चूर्ण काञ्जीमें मिला गरम कर नाभीपर लेप करनेसे अथवा जीवन्तीकी जड़का कल्क तैल मिलाकर लेप करनेसे पसलियोंका दर्द नष्ट होता है ॥ १५-१७ ॥

पित्तशूलचिकित्सा

गुडः शालिर्यवाः क्षीरं सर्पिष्पानं विरेचनम् ।
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् ॥ १८
पैत्ते तु शूले वमनं पयोभि-
रसैस्तथेक्षोः सपटोलनिम्बैः ।
शीतावगाहाः पुलिनाः सवाताः
कांस्यादिपात्राणि जलप्लुतानि ॥ १९ ॥
विरेचनं पित्तहरं च शस्तं
रसाश्च शस्ताः शशलावकानाम् ।
सन्तर्पणं लाजमधूपपन्नं
योगाः सुशीता मधुसंप्रयुक्ताः ॥ २० ॥
छर्द्यां ज्वरे पित्तभवेऽपि शूले
घोरे विदाहे त्वतितर्षिते च ।
यवस्य पेयां मधुना विमिश्रां
पिबेत्सशीतां मनुजः सुखार्थी ॥ २१ ॥
धात्र्या रसं विदार्या वा त्रायन्ती गोस्तनाम्बु वा ।
पिबेत्सशर्करं सद्यः पित्तशूलनिषूदनम् ॥ २२ ॥
शतावरीरसं क्षौद्रयुतं प्रातः पिबेन्नरः ।
दाहशूलोपशान्त्यर्थं सर्वपित्तामयापहम् ॥ २३ ॥

गुड़, शालिके चावल, यव, दूध, घीपान, विरेचन तथा जांगल प्राणियोंके मांस पित्तशूलवालोंको सेवन करना चाहिये । पैत्तिक शूलमें परवलकी पत्ती व नीमकी पत्तीका कल्क दूधमें अथवा ईखके रसमें मिला पीकर वमन करना चाहिये । इसी प्रकार शीतल जलादिमें बैठाना, नदीका तट, शुद्ध वायु तथा जलभरे कांस्यादि पात्र पेटपर फिराना, पित्तनाशक विरेचन, खरगोश अथवा बटेरका मांसरस, खील व शहदका सन्तर्पण अथवा शहदयुक्त शीतल पदार्थ सेवन करना हितकर है । पित्त-जन्य छर्दि, ज्वर, शूल, दाह तथा तृष्णामें यवकी पेया ठण्ढी कर शहद मिला पीनेसे शांति मिलती है । इसी प्रकार आंवलेका

–हन्त्यम्लपित्तमरुचिं रक्तपित्तं क्षयं वमिम्॥ शूलं च पित्तशूलं च पृष्ठरुग्घ्नं रसायनम्। विशेषाद्बलकृद् वृष्यं पुष्टिमोजस्करं स्मृतम्॥'' अच्छे पके हुए ताजे नारिकेल (नारियल) की गिरी १६ तोला प्रथम खूब महीन कतर या घिया कससे कसकर ४ तोला गायके घीमें भूनना चाहिये । जब सुखी आ जावे तथा सुगन्ध उठने लगे, तब उसमें मिश्री १६ तोला तथा नारियलका जल १ सेर, ९ छ० ३ तो० डालकर पकाना चाहिये । गाढ़ा हो जानेपर उतार लेना चाहिये तथा ठण्ढा हो जानेपर धनियां, छोटी पीपल, नागरमोथा, जीरा, वंशलोचन, दालचीनी, तेजपात, इलायची तथा नागकेशर प्रत्येक ३ माशेका चूर्ण मिला देना चाहिये । यह अम्लपित्त, अरुचि, रक्तपित. क्षय, वमन, शूल, पृष्ठशूल तथा पित्तशूलको नष्ट करता तथा रसायन है । (इसकी मात्रा ३ माशेसे १ तोले तक गुनगुने दूधके साथ देनी चाहिये ।) यह कुछ प्रतियोंमें मिलता है, कुछमें नहीं । इसे योगरत्नाकरमें पाठ भेदसे अम्लपित्ताधिकारमें लिखा है । यह बहुत स्वादिष्ट तथा गुणकारी है । इसका कितने ही बार अनुभव किया गया है ।

रस, विदारीकन्दका रस त्रायमाणका रस अथवा अंगूरका रस शक्कर मिलाकर पीनेसे शीघ्र ही पित्तज शूल नष्ट होता है।इसी प्रकार शतावरीका रस, शहद मिलाकर प्रातःकाल पीनेसे दाह, शूल तथा समस्त पित्तज रोग शांत होते हैं ॥ १ –२३ ॥

बृहत्यादिक्वाथः

बृहत्यौ गोक्षुरैरण्डकुशकाशेक्षुवालिकाः ।
पीताः पित्तभवं शूलं सद्यो हन्युः सुदारुणम्॥२४॥

छोटी कटेरी, बड़ी कटेरी, गोखरू, एरण्डकी छाल, कुश, काश, तथा ईखकी जड़का क्वाथ पित्तज शूलको तत्काल शांत करता है ॥ २४ ॥

शतावर्यादि जलम्

शतावरीसयष्ट्याह्ववाट्यालकुशगोक्षुरैः ।
शृतशीतं पिबेत्तोयं सगुडक्षौद्रशर्करम् ॥ २५ ॥
पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहम् ।

शतावरी, मौरेठी, खरेटी, कुश, तथा गोखुरूका जल ठण्ढा कर गुड, शहद व शक्कर मिलाकर पीनेसे रक्तपित्त, दाह, शूल तथा दाहयुक्त ज्वर शांत होता है ॥ २५ ॥-

त्रिफलादिक्वाथः

त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैः शृतम् ॥२६॥
पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये ।

त्रिफला, नीमकी छाल, मौरेठी, कुटकी, तथा अमलतासके गूदेका क्वाथ ठंढा कर शहद मिला पीनेसे दाहयुक्त शूल शान्त होता है ॥ २६ ॥-

एरण्डतैलयोगाः

तैलमेरण्डजं वापि मधुकक्वाथसंयुतम् ॥ २७ ॥
शूलं पित्तोद्भवं हन्याद् गुल्मं पैत्तिकमेव च ।

अथवा एरण्डका तैल मौरेठीके क्वाथके साथ पीनेसे पित्त शूल तथा पित्तज गुल्म शान्त होता है ॥ २७ ॥-

अपरत्रिफलादिक्वाथः

त्रिफलारग्वधक्वाथं सक्षौद्रं शर्करान्वितम् ॥२८॥
पाययेद्रक्तपित्तघ्नं दाहशूलनिवारणम् ।

त्रिफला तथा अमलतासका क्वाथ शहद व शक्कर मिलाकर पीनेसे रक्तपित्त तथा दाहयुक्त शूल नष्ट होता है ॥ २८ ॥-

धात्रीचूर्णम्

प्रलिह्यात्पित्तशूलघ्नं धात्रीचूर्णं समाक्षिकम्॥२९॥

आंवलेका चूर्ण शहदके साथ चाटनेसे पित्तशूल नष्ट होता है * ॥ २९ ॥

कफजशूलचिकित्सा

श्लेष्माधिके छर्दनलङ्घनानि
शिरोविरेकं मधुशीधुपानम् ।
मधूनि गोधूमयवानरिष्टान्
सेवेत रूक्षान्कटुकांश्च सर्वान् ॥ ३० ॥

कफाधिक शूलमें वमन, लंघन, शिरोविरेचन (नस्य) शहदके शीधु (मद्यविशेष) का पान, शहद, गेहूँ, यव, अरिष्ट तथा रूखे और कडुए समस्त पदार्थ हितकर हैं ॥ ३० ॥

पञ्चकोलयवागूः

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
यवागूर्दीपनीया स्याच्छूलघ्नी तोयसाधिता॥३१॥

पिप्पली, पीपलामूल चव्य, चीता, सोंठ इन ओषधियोंके क्वाथमें सिद्ध यवागू अग्निको दीप्त करती तथा कफजन्य शूल-को नष्ट करती है ॥ ३१ ॥

---

*अपरो नारिकेलखंडः। "नारिकेलपलान्यष्टौ शर्कराप्रस्थ-संयुतम् । तज्जलं पात्रमेकं तु सर्पिषश्चपलानि च ॥ शुण्ठीचूर्णस्य कुडवं प्रस्थार्द्धं क्षीरमेव च । सर्वमेकीकृतं पात्रे शनैर्मृद्वग्निना पचेत् ॥ तुगात्रिकटुकं मुस्तं चतुर्जातं सधान्यकम् । द्वे कणे कर्षयुग्मं च जीरकं च पृथक्पृथक् ॥ श्लक्ष्णचूर्णं विनिक्षिप्य स्थापयेद्भाजने मृदः । खादेत्प्रतिदिन शाणं यथेष्टाहारवानपि ॥ सर्वदोषभवं शूलमामवातं विनाशयेत्।परिणामभवं शूलमम्लपित्तं विनाशयेत् ॥ बलपुष्टिकरं चैव वाजीकरणमुत्तमम् । रक्तपित्तहरं श्रेष्ठं छर्दिहृद्रोगनाशनम् ॥अग्निसन्दीपनकरं सर्वरोगनिबर्हणम्॥" कच्ची गरी ३२ तोला, घी२०तोलामें प्रथम भून लेना चाहिये। फिर उसीमें शक्कर ६४ तोला और नारियलका जल ६ से० ३२ तोला, सोंठ १६ तोला, दूध६४तोला सब एकमें मिलाकर धीरे धीरे मन्द आंचसे पकाना चाहिये।पाक तैयार हो जानेपर उतार कर वंशलोचन, सोंठ, मिर्च, पीपल, नागरमोथा, दाल-चीनी, तेजपात, इलायची, नागकेशर, धनियां, छोटी पीपल, गजपीपल, जीरा इनमेंसे प्रत्येक ओषधिका यथा-विधि निर्मित २ तोला चूर्ण छोड़कर मिट्टीके बर्तनमें रखना चाहिये। इससे प्रतिदिन ३ माशा खाना चाहिये तथा यथेच्छ आहार करना चाहिये। यह समस्त दोषज शूल, आमवात, परिणाम शूल व अम्लपित्तको नष्ट करता है। यह रक्तपित्त, छर्दि व हृद्रोगको नष्ट, अग्निको दीप्त तथा समस्त रोगोंको दूर करता है। यह प्रयोग भी कुछ पुस्तकोंमें है, कुछमें नहीं। अतः टिप्पणी-रूपमें लिखा गया है ॥

पञ्चकोलचूर्णम्

लवणत्रयसंयुक्तं पञ्चकोलं सरामठम् ।
सुखोष्णेन म्बुना पीतं कफशूलविनाशनम् ॥ ३२ ॥

तीनों नमक, पञ्चकोल, तथा भुनी हींग सब समान भाग ले चूर्ण कर गरम जलके साथ पीनेसे कफजन्य शूल नष्ट होता हैं ॥ ३२ ॥

बिल्वमूलादिचूर्णम्

भिल्वमूलमथैरण्डं चित्रकं विश्वभेषजम् ।
हिंगुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥ ३३ ॥

बेलकी जड़की छाल, एरण्डकी छाल, चीतकी जड़, सोंठ तथा भुनी हींग व सेंधानमकका चूर्ण गरम जलके साथ पीनेसे तत्काल शूल नष्ट होता है ॥ ३३ ॥

मुस्तादिचूर्णम्

मुस्तं वचां तिक्तकरोहिणीं च
तथाभयां निर्दहनीं च तुल्याम् ।
पिबेत्तु गोमूत्रयुतां कफोत्थ-
शूले तथामस्य च पाचनार्थम् ॥ ३४ ॥

नागरमोथा, दूधिया वच, कुटकी, बड़ी हर्रका छिल्का तथा मूर्वा, समान भाग ले चूर्ण कर गोमूत्रके साथ पीनेसे कफज शूलका नाश तथा आमका पाचन होता है ॥ ३४ ॥

वचादिचूर्णम्

वचाब्दाग्न्यभयातिक्ताचूर्णं गोमूत्रसंयुतम् ।
सक्षारं पा पिबेत्काथं बिल्वादेः कफशूलवान् ३५॥

मीठा वच, नागरमोथा, चीतकी जड़, बड़ी हर्रका छिल्का तथा कुटकीका चूर्ण गोमूत्रके साथ अथवा बिल्वादि गणकी औषधियोंका क्काथ यवाखार मिलाकर पीनेसे कफजन्य शूल नष्ट होता है ॥ ३५ ॥

योगद्वयम्

मातुलुङ्गरसो वापि शिग्रुक्काथस्तथापरः ।
सक्षारो मधुना पीतः पार्श्वहृद्वस्तिशूलनुत् ॥ ३६ ॥

(१) बिजौरे निम्बूका रस (२) अथवा सहिंजनकाक्काथ यवाखार व शहद मिलाकर पीनेसे पसली, हृदय तथा वस्तिके शूलको नष्ट करते हैं ॥ ३६ ॥

आमशूलचिकित्सा

आमशूले क्रिया कार्या कफशूलविनाशिनी ।
सेव्यमामहरं सर्वं यदग्निबलवर्धनम् ॥ ३७ ॥

आमशूलमें कफशूल नाशक तथा अग्निदीपक व आमपाचक चिकित्सा करनी चाहिये ॥ ३७ ॥

हिंग्वादिचूर्णम्

सहिङ्गुतुम्बुरुव्योषयमानीचित्रकाभयाः ।
सक्षारलवणाश्चूर्णं पिबेत्प्रातः सुखाम्बुना ॥ ३८ ॥
विण्मूत्रानिलशूलघ्नं पाचनं वह्निदीपनम् ।

भुनी हींग, तुम्बरू, त्रिकटु, अजवायन, चीतकी जड़, बड़ी हर्रका छिल्का, यवाखार, व सेंधानमक सब समान भाग ले चूर्ण कर गुनगुने गुनगुने जलके साथ पीनेसे विष्ठा, मूत्र तथा वायुकी रुकावट तथा शूल नष्ट होता है और आमका पाचन तथा अग्नि दीप्त होती है * ॥ ३८ ॥

---

* धात्रीलौहम्–"षट्पलं शुद्धमण्डूरं यवस्य कुडवं तथा पाकाय नीरप्रस्थार्धे चतुर्भागावशेषितम् ॥ शतमूलीरसस्याष्टावामलक्या रसस्तथा । तथा दधिपयोभूमिकूष्माण्डस्य चतुष्पलम् ॥ चतुष्पलं शर्करायाः घृतस्य च चतुष्पलम् । प्रक्षेपं जीरकं धान्यं त्रिजातं करि-पिप्पलीम् ॥ मुस्तं हरीतकीं चैव अभ्रं लौहं कटुत्रयम् । रेणुकं त्रिफलां चैव तालीशं नागकेशरम् ॥ प्रत्येकं कार्षिकं चूर्णं पेषयित्वा विनिक्षिपेत् । भोजनादौ तथा मध्ये चान्ते चैव समाहितः । तोलिकं भक्षयेन्नित्यमनुपानं पयोऽथवा शूलमष्टविधं हन्ति साध्यासाध्यमथापि वा ॥ वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम् । परिणामसमुत्थांश्च अन्नद्रवसमुद्भवान् ॥ द्वन्द्वजान्पक्तिशूलांश्च अम्लपित्तं सुदारुणम् । सर्वशूलहरं श्रेष्ठं धात्रीलौहमिदं स्मृतम् ॥" शुद्ध मण्डूर २४ तो०, यव १६ तोला को ६४ तो० जलमें पकाकर १६ तो० शेष छना हुआ क्काथ, शतावरका रस ३२ तोला, आंवलेका रस ३२ तो० तथा दही १६ तो० दूध १६ तो० तथा विदारीकन्दका रस १६ तो०, शक्कर १६ तो० तथा घी १६ तो० सबको मिलाकर पकाना चाहिये । पाक तयार हो जानेपर जीरा, धनियां, दालचिनी, तेजपात, इलायची, नागकेसर, गजपीपल, नागरमोथा, हर्र, अभ्रकभस्म, लौहभस्म, त्रिकटु, सम्भालूके बीज, त्रिफला तथा तालीशपत्र प्रत्येक १ तो० का चूर्ण छोड़ना चाहिये । इसको भोजनके पहिले, मध्यमें तथा अन्तमें १ तो० की मात्रासे सेवन करना चाहिये । अनुपान दूध अथवा जल । यह "धात्रीलौह" साध्य तथा असाध्य वातिक, पैत्तिक, श्लैष्मिक तथा सान्निपातिक, अन्नद्रव, परिणामजन्य शूल तथा कठिन अम्ल पित्तको नष्ट करता है । यह समस्त शूलको नष्ट करनेमें श्रेष्ठ है । वर्तमान समयमें इसकी मात्रा ४ रत्तीसे २ माशेतक है । यह प्रयोग भी किसी किसीमें है, किसीमें नहीं । अतः टिप्पणीरूपमें लिखा गया है ॥

चित्रकादिक्वाथः

चित्रकं ग्रन्थिकैरण्डशुण्ठीधान्यं जलैः शृतम् ॥३९॥
शूलानाहविबन्धेषु सहिंगु विडदाडिमम् ।

चीतकी जड़, पिपरामूल, एरण्डकी छाल, सोंठ, तथा धनियांका क्वाथ बना भुनी हींग, विड़नमक तथा अनारका रस मिलाकर पीनेसे शूल, अफारा तथा कब्जियत दूर होती है॥३९

दीप्यकादिचूर्णम्

दीप्यकं सैन्धवं पथ्या नागरं च चतुःसमम् ॥
भृशं शूलं जयत्याशु मन्दस्याग्नेश्च दीपनम् ॥४०॥

अजवायन, सेंधानमक, हर्र तथा सोंठ, चारों समान भाग ले चूर्ण कर सेवन करनेसे शूलका नाश तथा अग्निकी दीप्ति होती है ॥ ४० ॥

पित्तानिलात्मजशूलचिकित्सा

समाक्षिकं बृहत्यादिं पिबेत्पित्तानिलात्मके ।
व्यामिश्रं वा विधिं कुर्याच्छूले पित्तानिलात्मके ४१

पित्तानिलात्मक शूलमें बृहत्यादि ओषधियोंका क्वाथ शहद मिलाकर पीना चाहिये तथा वातपित्तकी अलग अलग कही हुई चिकित्सा अंशांश कल्पना कर मिश्रित करनी चाहिये ॥ ४१ ॥

कफपित्तजशूलचिकित्सा

पित्तजे कफजे चापि या क्रिया कथिता पृथक् ।
एकीकृत्य प्रयुञ्जीत तां क्रियां कफपित्तजे ॥४२॥

पित्तज तथा कफजमें जो अलग अलग चिकित्सा कही गयी है, उसे कफपित्तज शूलमें मिलाकर करना चाहिये ॥ ४२ ॥

पटोलादिक्वाथः

पटोलत्रिफलारिष्टाकाथं मधुयुतं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये ॥ ४३ ॥

परवलकी पत्ती, आंवला, हर्र, बहेड़ा तथा नीमकी छालका क्वाथ शहद मिलाकर पीनेसे पित्तकफज्वर, छर्दि, दाह और शूल शान्त होते हैं ॥ ४३ ॥

वातश्लेष्मजचिकित्सा

रसोनं मधुसंमिश्रं पिबेत्प्रातः प्रकाङ्क्षितः ।
वातश्लेष्मभवं शूलं विहन्तुं वह्निदीप्तये ॥ ४४ ॥

लहसुनका कल्क प्रातःकाल शहद मिलाकर चाटनेसे वातकफजशूल नष्ट हो जाता है तथा अग्नि दीप्त होती है ॥ ४४ ॥

विश्वादिक्वाथः

विश्वोरुबूकदशमूलयवाम्भसा तु
द्विक्षारहिंगुलवणत्रयपुष्कराणाम् ।
चूर्णं पिबेद् धृदयपार्श्वकटीग्रहाम-
पक्वाशयांसभृशरुग्ज्वरगुल्मशूली ॥ ४५ ॥
क्वाथेन चूर्णपानं यत्तत्र क्वाथप्रधानता ।
प्रवर्तते न तेनात्र चूर्णापेक्षी चतुर्द्रवः ॥ ४६ ॥

सोंठ, एरण्डकी छाल, दशमूल और यवका क्वाथ बना यवाखार, सज्जीखार, भुनी हींग, तीनों नमक, तथा पोहकरमूलका चूर्ण मिलाकर पीनेसे हृदय, पसलियों व कमरका दर्द, आमाशय व पक्वाशयकी पीड़ा, ज्वर, गुल्म व शूल नष्ट होते हैं । जहांपर क्वाथसे चूर्णपान लिखा है, वहां क्वाथकी प्रधानता है । अतः चूर्णकी अपेक्षा चतुर्गुण द्रव छोड़ना यहां नहीं लगता ॥ ४५ ॥ ४६ ॥

रुचकादिचूर्णम् ।

चूर्णं समं रुचकहिंगुमहौषधानां
शुण्ठ्यम्बुना कफसमीरणसम्भवासु ।
हृत्पार्श्वपृष्ठजठरार्तिविषूचिकासु
पेयं तथा यवरसेन तु विड्विबन्धे ॥ ४७ ॥
समं शुण्ठ्यम्बुनेत्येवं योजना क्रियते बुधैः ।
तेनाल्पमानमेवात्र हिंगु संपरिदीयते ॥ ४८ ॥

काला नमक, भुनी हींग तथा सोंठका चूर्ण सोंठके क्वाथके साथ पीनेसे कफवातजन्य हृदय, पसलियों, पीठ व उदरकी पीड़ा तथा विषूचिका नष्ट होते हैं । मलकी रुकावटमें इसी चूर्णको यवके क्वाथके साथ पीना चाहिये । इस पद्यमें 'समं' का संबन्ध 'शुण्ठ्यम्बुना' से है, और वह सहार्थक है तुल्यार्थक नहीं, अतः हींग भी समान डालना उचित नहीं । हींग उतनी ही छोड़नी चाहिये, जितनीसे मिचलाई न हो ॥ ४७ ॥४८ ॥

हिंग्वादिचूर्णम्

हिंगु सौवर्चलं पथ्याविडसैन्धवतुम्बुरु ।
पौष्करं च पिबेच्चूर्णं दशमूलयवाम्भसा ॥४९॥
पार्श्वहृत्कटिपृष्ठांसशूले तन्त्रापतानके ।
शोथे श्लेष्मामसेके च कर्णरोगे च शस्यते ॥५०॥

भुनी हींग, तथा काला नमक, हर्र विड़लवण, सेंधा नमक, तुम्बुरु तथा पोहकरमूल सब समान भाग ले चूर्ण कर दशमूल व यवके क्वाथके साथ सेवन करनेसे पसलियों, हृदय कमर,

---

१ "द्रवशुक्त्या स लेढव्यः पातव्यश्च चतुर्द्रवः" इस सिद्धान्तके अनुसार चूर्णसे चतुर्गुण ही क्वाथ मिलाना चाहिये था, पर इस (क्वाथेन चूर्णपानम्) परिभाषासे क्वाथकी प्रधानता सिद्ध हो जानेपर क्वाथकी मात्रा २ पल ही लेनी चाहिये ।

पीठ और स्कन्धका शूल, अपतन्त्रक, अपतानक, शोथ, कफ व आमका गिरना तथा कर्णरोग शान्त होते हैं ॥ ४९ ॥ ५० ॥

एरण्डादिक्वाथः

एरंडबिल्वबृहतीद्वयमातुलुङ्ग-
पाषाणभित्त्रिकटुमूलकृतः कषायः ।
सक्षारहिंगुलवणो रुबुतैलमिश्रः
श्रोण्यंसमेढ्रहृदयस्तनरुक्षु पेयः ॥ ५१ ॥

एरण्डकी छाल, बेलका गूदा, बड़ी कटेरी, छोटी कटेरी, बिजौराकी छाल, पाषाणभेद, त्रिकटु और पिपरामूलका क्वाथ, यवाखार, भुनी हींग, कालनमक तथा एरण्डका तैल मिलाकर कमर, कन्धे, लिङ्ग, हृदय और स्तनोंकी पीड़ामें पीना चाहिये ॥ ५१ ॥

हिंग्वादिचूर्णमपरम्

हिंगु त्रिकटुकं कुष्ठं यवक्षारोऽथ सैन्धवम् ।
मातुलुङ्गरसोपेतं प्लीहशूलापहं रजः ॥ ५२ ॥

भुनी हींग, त्रिकटु, कूट, यवाखार तथा सेंधानमकका चूर्ण बिजौरे निम्बूके रसके साथ पीनेसे प्लीहाका शूल नष्ट होता है ॥ ५२ ॥

मृगशृङ्गभस्म

दग्धमनिर्गतधूमं मृगशृङ्गं गोघृतेन सह पीतम् ।
हृदयनितम्बजशूलं हरति शिखी दारुनिवहमिव ५३

सम्पुटमें बन्द कर गजपुटमें भस्म किया हुआ मृगशृङ्ग गायके घीके साथ चाटनेसे हृदय तथा कमरके शूलको अग्नि लकड़ियोंके ढेरके समान नष्ट करता है ॥ ५३ ॥

विडङ्गचूर्णम्

क्रिमिरिपुचूर्णं लीढं स्वरसेन वङ्गसेनस्य
क्षपयत्यचिरान्नियतं लेहोऽजीर्णोद्भवं शूलम् ॥५४॥

वायविडंगका चूर्ण अगस्त्यके स्वरसके साथ चाटनेसे शीघ्र ही अजीर्णजन्य शूल नष्ट होता है ॥ ५४ ॥

सन्निपातजशूलचिकित्सा

विदार्यादिरसः

विदारीदाडिमरसः सव्योषलवणान्वितः
क्षौद्रयुक्तो जयत्याशु शूलं दोषत्रयोद्भवम् ॥५५॥

विदारीकन्द और अनारका रस, सोंठ, मिर्च, पीपल व सेंधानमकका चूर्ण व शहद मिलाकर पीनेसे सन्निपातजन्य शूल शीघ्र ही नष्ट होता है ॥ ५५ ॥

एरण्डद्वादशकक्वाथः

एरण्डफलमूलानि बृहतीद्वयगोक्षुरम् ।
पर्णिन्यः सहदेवी च सिंहपुच्छीक्षुबालिका ॥५६॥
तुल्यैरेतैः शृतं तोयं यवक्षारयुतं पिबेत् ।
पृथग्दोषभवं शूलं हन्यात्सर्वभवं तथा ॥ ५७ ॥

एरण्डके बीज तथा जड़की छाल, दोनों कटेरी, गोखरू, मुद्गपर्णी, माषपर्णी, शालपर्णी पृष्ठपर्णी, सहदेवी, पिठवन तथा ईखकी जड़ सब समान भाग ले क्वाथ बना यवाखार मिलाकर पीनेसे दोषोंसे अलग अलग उत्पन्न शूल तथा सन्निपातज शूल नष्ट होता है ॥ ५६ ॥ ५७ ॥

गोमूत्रमण्डूरम्

गोमूत्रसिद्धं मण्डूरं त्रिफलाचूर्णसंयुतम् ।
विलिहन्मधुसर्पिर्भ्यां शूलं हन्ति त्रिदोषजम् ॥५८॥

गोमूत्रमें बुझाया गया मण्डूर, त्रिफलाका चूर्ण मिलाकर शहद व घीके साथ चाटनेसे सन्निपातज शूल नष्ट होता है ॥ ५८ ॥

शंखचूर्णम्

शङ्खचूर्णं सलवणं सहिंगु व्योषसंयुतम्
उष्णोदकेन तत्पीतं शूलं हन्ति त्रिदोषजम् ॥५९॥

शंखचूर्ण (भस्म) काला नमक, भुनी हींग व त्रिकटु चूर्ण मिलाकर गरम जलके साथ पीनेसे त्रिदोषज शूल नष्ट होता है ॥ ५९ ॥

लौहप्रयोगः

तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम् ।
प्रयोज्यं मधुसर्पिर्भ्यां सर्वशूलनिवारणम् ॥ ६० ॥

तीक्ष्ण लोह भस्म व त्रिफलाका चूर्ण मिलाकर शहद व घीके साथ चाटनेसे समस्त शूल नष्ट होते हैं ॥ ६० ॥

मूत्राभयायोगः

मूत्रान्तःपाचितां शुद्धां लौहचूर्णसमन्विताम् ।
सगुडामभयामद्यात्सर्वशूलप्रशान्तये ॥ ६१ ॥

गौमूत्रमें पकायी हुई हरोंका चूर्ण, लौहभस्म तथा गुड़ मिलाकर खानेसे समस्त शूल शान्त होते हैं ॥ ६१ ॥

दाधिकं घृतम्

पिप्पलं नागरं बिल्वं कारवी चव्यचित्रकम् ।
हिंगुदाडिमवृक्षाम्लवचाक्षाराम्लवेतसम् ॥ ६२ ॥
वर्षाभूकृष्णलवणमजाजी बीजपूरकम् ।
दधि त्रिगुणितं सर्पिस्तत्सिद्धं दाधिकं स्मृतम् ॥६३
गुल्मार्शःप्लीहहृत्पार्श्वशूलयोनिरुजापहम् ।
दोषसंशमनं श्रेष्ठं दाधिकं परमं स्मृतम् ॥ ६४ ॥

छोटी पीपल, सोंठ, बेलका गूदा, कलौंजी, चव्य, चीतकी जड़, हींग अनारदाना, बिजौरा, निम्बू, बच, यवाखार, अम्लवेत, पुनर्नवा, काला नमक, सफेद जीरा, तथा इम्ली सब समान भाग ले कल्क बना कल्कसे चौगुना घी और घीसे तिगुना दही तथा घीके समान भाग जल मिलाकर सिद्ध किया गया घृत सेवन करनेसे गुल्म, अर्श, प्लीहा, हृद्रोग, पार्श्वशूल, योनिशूलको नष्ट करता तथा त्रिदोषको शान्त करता है। यह "दाधिकघृत" (दध्ना संस्कृत) है ॥ ६२-६४ ॥

शूलहरधूपः

कम्बलावृतगात्रस्य प्राणायामं प्रकुर्वतः ।
कटुतैलाक्तसक्तूनां धूपः शूलहरः परः ॥ ६५ ॥

कम्बल ओढ़कर प्राणायाम करते हुए कडुए तैलमें साने सत्तूका धूप शूलको नष्ट करनेमें श्रेष्ठ है ॥ ६५ ॥

अपथ्यम्

व्यायामं मैथुनं मद्यं लवणं कटु वैदलम् ।
वेगरोधं शुचं क्रोधं वर्जयेच्छूलवान्नरः ॥ ६६ ॥

कसरत, मैथुन, मद्य, नमक, कटु द्रव्य, दाल, वेगावरोध, शोक तथा क्रोध शूलवान्को त्याग देना चाहिये ॥ ६६ ॥

इति शूलाधिकारः समाप्तः ।

अथ परिणामशूलाधिकारः

सामान्यचिकित्सा

वमनं तिक्तमधुरैर्विरेकश्चापि शस्यते ।
बस्तयश्च हिताः शूले परिणामसमुद्भवे ॥ १ ॥

तिक्त तथा मीठे द्रव्योंसे वमन तथा विरेचन कराना प्रशस्त है । और बस्तिकर्म कराना परिणामशूलमें हितकर है ॥ १ ॥

विडङ्गादिगुटिका

विडङ्गतण्डुलव्योषं त्रिवृद्दन्तीसचित्रकम् ।
सर्वाण्येतानि संस्कृत्य सूक्ष्मचूर्णानि कारयेत् ॥ २ ॥
गुडेन मोदकं कृत्वा भक्षयेत्प्रातरुत्थितः ।
उष्णोदकानुपानं तु दद्यादग्निविवर्धनम् ।
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥ ३ ॥

वायविडंग, सोंठ, मिर्च, पीपल, निसोथ, दन्ती, तथा चीतेकी जड़ सब साफ कर चूर्ण करना चाहिये । फिर चूर्णसे दूना गुड़ मिला गोली बनाकर प्रातःकाल गरम जलके साथ खानेसे त्रिदोषजन्य परिणामशूल नष्ट होता है तथा अग्नि दीप्त होती है ॥ २ ॥ ३ ॥

नागरादिलेहः

नागरतिलगुडकल्कं पयसा संसाध्य यः पुमानद्यात् ।
उग्रं परिणतिशूलं तस्यापैति त्रिसप्तरात्रेण ॥ ४ ॥

सोंठ, तिल व गुड़का कल्क दूधके साथ पकाकर जो खाता है, उसका परिणामशूल इक्कीस दिनके प्रयोगसे अवश्य नष्ट हो जाता है ॥ ४ ॥

शम्बूकभस्म

शम्बूकजं भस्म पीतं जलेनोष्णेन तत्क्षणात् ।
पक्तिजं विनिहन्त्येतच्छूलं विष्णुरिवासुरान् ॥५॥

शंख या घोंघाकी भस्म गरम जलके साथ पीनेसे परिणामशूलको इस प्रकार नष्ट करता है जैसे विष्णु भगवान् राक्षसोंका नाश करते हैं ॥ ५ ॥

बिभीतकादिचूर्णम्

अक्षधात्र्यभयाकृष्णाचूर्णं मधुयुतं लिहेत् ।
दध्ना तु नवसारेण सतीनयवसक्तुकान् ॥६॥
भक्षयन्मुच्यते शूलान्नरोऽनुपरिवर्तनात् ।

बहेड़ा, आंवला, बड़ी हर्रका छिल्का तथा छोटी पीपलके चूर्णको शहदके साथ मिलाकर चाटना चाहिये । तथा मक्खन निकाले दहीके साथ, मटर व यवके सत्तुओंके खानेसे परिणाम शूल नष्ट हो जाता है ॥ ६ ॥

तिलादिगुटिका

तिलनागरपथ्यानां भागं शम्बूकभस्मनाम् ॥ ७ ॥
द्विभागं गुडसंयुक्तं गुडीं कृत्वाक्षभागिकाम् ।
शीताम्बुपानां पूर्वाह्णे भक्षयेत्क्षीरभोजनः ॥ ८ ॥
सायाह्ने रसकं पीत्वा नरो मुच्येत दुर्जयात् ।
परिणामसमुत्थाच्च शूलाच्चिरभवादपि ॥ ९ ॥

तिल, सोंठ, तथा हर्र प्रत्येक एक भाग, शम्बूकभस्म २ भाग सबसे द्विगुण गुड़ मिलाकर १ तो० की गोली बना ठण्ढे जलके साथ सबेरे खाना चाहिये तथा दूधका पथ्य लेना चाहिये । सायङ्काल मांसरस पीना चाहिये । इससे मनुष्य कठिन पुराने परिणामशूलसे मुक्त हो जाता है ॥ ७-९ ॥

शम्बूकादिवटी

शम्बूकं त्र्यूषणं चैव पञ्चैव लवणानि च ।
समांशां गुडिकां कृत्वा कलम्बूरसकेन वा ॥१०॥
प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम् ।
शूलाद्विमुच्यते जन्तुः सहसा परिणामजात् ॥११॥

शम्बूकभस्म त्रिकटु तथा पांचों नमक, समान भाग लेकर करेमुवा (नाड़ी) के रसमें गोली बनाकर प्रातःकाल या

भोजतके समय बलानुसार सेवन करना चाहिये । इससे परिणामशूल नष्ट होता है ॥ १० ॥ ११ ॥

शक्तुप्रयोगः

यः पिबति सप्तरात्रं शक्तूनेकान्कलाययूषेण ।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम्

जो सात दिनतक मटरके यूषके साथ केवल सत्तूका सेवन करता है, उसका नवीन क्या पुराना भी परिणामशूल नष्ट होता है ॥ १२ ॥

लौहप्रयोगः

लोहचूर्णं वरायुक्तं विलीढं मधुसर्पिषा ।
परिणामशूलं शमयेत्तन्मलं वा प्रयोजितम् ॥ १३॥
कृष्णाभयालौहचूर्णं गुडेन सह भक्षयेत् ।
पक्तिशूलं निहन्त्येजठराण्यग्निमन्दताम् ॥ १४ ॥
आमवातविकारांश्च स्थौल्यं चैवापकर्षति ।
पथ्यालोहरजःशुण्ठीचूर्णं माक्षिकसर्पिषा ॥ १५ ॥
परिणामरुजं हन्ति वातपित्तकफात्मिकाम् ।

लोहभस्म और त्रिफलाको शहद व घीमें मिला चाटनेसे तथा इसी प्रकार मण्डूर सेवन करनेसे परिणामशूल नष्ट होता है। अथवा छोटी पीपल, बड़ी हर्रका छिल्का, लौहभस्म तथा गुड़ मिलाकर सेवन करनेसे परिणामशूल, उदररोग तथा अग्निमान्द्य और आमवात नष्ट होता है और स्थूलता मिटती है। अथवा लौहभस्म, हर्र व सोंठका चूर्ण शहद और घीमें मिलाकर चाटनेसे त्रिदोषज परिणामशूल नष्ट होता है ॥ १३-१५ ॥-

सामुद्राद्यं चूर्णम्

सामुद्रं सैन्धवं क्षारो रुचकं रौमकं बिडम् ।
दन्ती लौहरजःकिट्टं त्रिवृच्छूरणकं समम् ॥ १६ ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥ १७ ॥
जीर्णे जीर्णे तु भुञ्जीत मांसादि घृतसाधितम् ।
नाभिशूलं यकृच्छूलं गुल्मप्लीहकृतं च यत् ॥१८॥
विद्रध्यष्ठीलिकां हन्ति कफवातोद्भवां तथा ।
शूलानामपि सर्वेषामौषधं नास्ति तत्परम् ॥ १९ ॥
परिणामसमुत्थस्य विशेषेणान्तकृन्मतम् ।

१ लौहभस्मकी मात्रा १ रत्तीसे २ रत्तीतक तथा चूर्ण ३ मासेतक मिलाना चाहिये । अथवा प्रत्येक चूर्णके समान लौहभस्म अथवा समस्त चूर्णके समान लौहभस्म मिलाकर सेवन करना चाहिये। इसकी मात्रा ४ रत्तीसे १ माशेतक लेनी चाहिये ॥

सामुद्र नमक, सेंधा नमक, काला नमक, रूमा नमक,(शांभरनमक,) खारी नमक, बिड नमक, दन्ती, लोहभस्म, मण्डूर, निसोथ, तथा जिमींकन्द सब समान भाग ले चूर्ण कर दही, गोमूत्र, दूध प्रत्येक चूर्णसे चतुर्गुण छोड़कर मन्द अग्निसे पकाना चाहिये । सिद्ध हो जानेपर अग्निबलके अनुसार गरम जलके साथ पीना चाहिये । औषधि हजम हो जानेपर घीके साथ पकाये मांसका सेवन करना चाहिये। नाभिशूल, यकृच्छूल, गुल्म, प्लीहाका शूल, विद्रधि तथा कफ, वातज अष्ठीलिका, और समस्तशूलोंको नष्ट करनेके लिये इससे बढ़कर कोई प्रयोग नहीं है। पर परिणामशूलको यह विशेष नष्ट करता है ॥ १६-१९ ॥ ॥-

नारिकेलामृतम्

नारिकेलं सतोयं च लवणेन प्रपूरितम् ॥ २० ॥
विपक्वमग्निना सम्यक्परिणामजशूलनुत् ।
वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम् २१॥

जल भरे हुए नारियलके गोलेमें नमक भरकर अग्निसे अच्छी तरह पका लेना चाहिये । यह परिणामशूलको तथा वातज, पित्तज, कफज व सन्निपातजन्य परिणामशूलको नष्ट करता है ॥ २० ॥ २१ ॥

सप्तामृतं लौहम्

मधुकं त्रिफलाचूर्णमयोरजःसमं लिहन् ।
मधुसर्पियुतं सम्यग्गव्यं क्षीरं पिबेदनु ॥ २२ ॥
छर्दिं सतिमिरां शूलमम्लपित्तं ज्वरं क्लमम् ।
आनाहं मूत्रसङ्गं च शोथं चैव निहन्ति सः ॥२३॥

मौरेठी, त्रिफलाका चूर्ण और लौहभस्म प्रत्येक समान भाग लेकर घी और शहदमें मिलाकर चाट ऊपरसे गायका दूध पीना चाहिये । यह वमन, नेत्रोंकी निर्बलता अन्धकार, शूल, अम्लपित्त, ज्वर,ग्लानि, अफारा,मूत्रकी रुकावट तथा सूजनको नष्ट करता है ॥ २२ ॥ २३ ॥

गुडपिप्पलीघृतम्

सपिप्पलीगुडं सर्पिः पचेत्क्षीरचतुर्गुणे ।
विनिहन्त्यम्लपित्तं च शूलं च परिणामजम् ॥२४॥

छोटी पीपल, व गुड़का कल्क तथा चतुर्गुण दूध मिलाकर पकाया गया घी अम्लपित्त व परिणामशूलको नष्ट करता है ॥ २४ ॥

पिप्पलीघृतम्

क्वाथेन कल्केन च पिप्पलीनां
सिद्धं घृतं माक्षिकसंप्रयुक्तम् ।
क्षीरान्नपस्यैव निहन्त्यवश्यं
शूलं प्रवृद्धं परिणापसंज्ञम् ॥ २५ ॥

छोटी पीपलके क्वाथ व कल्कसे सिद्ध किये घृतमें शहद मिला कर चाटनेसे तथा दूध भातका पथ्य सेवन करनेसे अवश्य ही परिणामशूल नष्ट हो जाता है ॥ २५ ॥

कोलादिमण्डूरम्

कोलाग्रन्थिकशृङ्गवेरचपलाक्षारैः समं चूर्णितं
मण्डूरं सुरभीजलेऽष्टगुणिते पक्त्वाथ सान्द्रीकृतम्।
तं खादेदशनादिमध्यविरतौ प्रायेण दुग्धान्नभुग्
जेतुं वातकफामयान्परिणतौ शूलं च शूलानि च २६

चव्य, पिपरामूल, सोंठ, पीपल, तथा यवाखार प्रत्येक समान भाग, सबके समान मण्डूरका चूर्ण अठगुने गायके मूत्रमें पका गाढ़ा कर लेना चाहिये। इसे भोजनके पहिले, मध्य तथा अन्तमें खाना चाहिये और दूध भातका पथ्य लेना चाहिये। इससे वात व कफके रोग, परिणामशूल तथा अन्यशूल नष्ट होते हैं ॥ २६ ॥

भीमवटकमण्डूरम्

कोलाग्रन्थिकसहितैर्विश्वौषधमागधीयवक्षारैः।
प्रस्थमयोरजसामपि पलिकांशैश्चूर्णितैर्मिश्रैः॥२७॥
अष्टगुणमूत्रयुक्तं क्रमपाकात्पिण्डतां नयेत्सर्वम्।
कोलप्रमाणा गुडिकास्तिस्रो भोज्यादिमध्यविरतौ२८
रससर्पिर्यूषपयोमांसैरश्नन्नरो निवारयति।
अन्नविवर्तनशूलं गुल्मं प्लीहाग्निसादांश्च॥२९॥

चव्य, ४ तोला, पिपरामूल, सोंठ, छोटी पीपल तथा यवाखार प्रत्येक ४ तोला तथा लौहभस्म ६४ तोला सबसे अठगुना गोमूत्र मिला क्रमशः मन्द मध्य तीक्ष्ण आंचसे पकाकर गोली बनानेके योग्य हो जानेपर ६ माशेके बराबर गोली बनानी चाहिये। इसे भोजनके पहिले मध्यमें तथा अन्तमें एक एक गोली खानी चाहिये और मांसरस, घी, यूष तथा मांसके साथ भोजन करना चाहिये। इससे परिणामशूल, गुल्म, तथा प्लीहा व अग्निमांद्य नष्ट होते हैं ॥ २७-२९ ॥

क्षीरमण्डूरम्

लोहकिट्टपलान्यष्टौ गोमूत्रार्धाढके पचेत्।
क्षीरप्रस्थेन तत्सिद्धं पक्तिशूलहरं नृणाम् ॥ ३० ॥

लोहकिट्ट (मण्डूर) ३२ तोला, गोमूत्र आधा आढ़क तथा दूध एक प्रस्थ मिलाकर पकाया गया मनुष्योंके परिणामशूलको नष्ट करता है ॥ ३० ॥

चविकादिमण्डूरम्

लौहकिट्टपलान्यष्टौ गोमूत्रेऽष्टगुणे पचेत्।
चविकानागरक्षारपिप्पलीमूलपिप्पलीः ॥ ३१ ॥
संचूर्ण्य निक्षिपेत्तस्मिन्दलांशाः सान्द्रतां गते।
गुडिकाः कल्पयेत्तेन पक्तिशूलनिवारिणीः ॥ ३२ ॥

लौहकिट्ट ३२ तोला, गोमूत्र ६४ पल, छोटी पीपल, चव्य, सोंठ, यवाखार, पिपरामूल, प्रत्येक ४ तोला छोड़कर पकाना चाहिये। गाढ़ा हो जानेपर गोली बनानी चाहिये। यह परिणाम शूलको नष्ट करती है ॥ ३१ ॥ ३२ ॥

गुडमण्डूरप्रयोगः

मण्डूरं शोधितं भूतिं लोहजां वा गुडेन तु।
भक्षयेन्मुच्यते शूलात्परिणामसमुद्भवात् ॥ ३३ ॥

शुद्ध किया मण्डूर अथवा लौहभस्मको गुड़के साथ खानेसे परिणामशूल नष्ट होता है ॥ ३३ ॥

शतावरीमण्डूरम्

संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम्।
शतावरीरसस्याष्टौ दध्नस्तु पयसस्तथा ॥ ३४ ॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः।
विपचेत्सर्वमेकध्यं यावत्पिण्डत्वमागतम् ॥ ३५ ॥
सिद्धं तु भक्षयेन्मध्ये भोजनस्याग्रतोऽपि वा।
वातात्मकं पित्तभवं शूलं च परिणामजम् ॥ ३६ ॥
निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः।

शुद्ध तथा चूर्ण किया मण्डूर ३२ तोला, शतावरीका रस ३२ तोला, दही ३२ तोला, दूध २२ तोला तथा गायका घी १६ तोला, सबको एकमें मिलाकर पकाना चाहिये। सिद्ध हो जानेपर भोजनके पहले अथवा मध्यमें खाना चाहिये। वातज तथा पित्तज परिणामशूलको यह "शतावरी मण्डूर" नष्ट करता है ॥ ३४-३६ ॥

तारामण्डूरगुडः

विडङ्गं चित्रकं चव्यं त्रिफला त्र्यूषणानि च ॥३७॥
नवभागानि चैतानि लोहकिट्टसमानि च।
गोमूत्रं द्विगुणं दत्त्वा मूत्राधिकगुडान्वितम्॥३८॥
शनैर्मृद्वग्निना पक्त्वा सुसिद्धं पिण्डतां गतम्।
स्निग्धे भाण्डे विनिक्षिप्य भक्षयेत्कोलमात्रया३९॥
प्राङ्मध्यादिक्रमेणैव भोजनस्य प्रयोजितः।
योगोऽयं शमयत्याशु पक्तिशूलं सुदारुणम् ॥४०॥
कमलां पाण्डुरोगं च शोथं मन्दाग्नितामपि।
अर्शांसि ग्रहणीदोषं क्रिमिगुल्मोदराणि च ॥४१॥
नाशयेदम्लपित्तं च स्थौल्यं चैवापकर्षति।
वर्जयेच्छुष्कशाकानि विदाह्यम्लकटूनि च ॥४२॥
पक्तिशूलान्तको ह्येष गुडो मण्डूरसंज्ञकः।
शूलार्तानां कृपाहेतोस्तारया परिकीर्तितः ॥४३॥

वायविडङ्ग, चीतकी जड़, चव्य, त्रिफला व त्रिकटु प्रत्येक एक भाग, सबके बराबर मण्डूर, सबसे द्विगुण गोमूत्र तथा गोमूत्रसे आधा गुड़ मिलाकर धीरे धीरे मन्दाग्निसे पकाकर गाढ़ा हो जानेपर चिकने बर्तनमें रखना चाहिये। ६ माशेकी मात्रासे भोजनके पहिले, मध्य तथा अन्तमें इसका प्रयोग करना चाहिये। यह कठिनसे कठिन परिणामशूल, कामला, पाण्डुरोग, शोथ, मन्दाग्नि, अर्श, ग्रहणी, क्रिमिरोग, गुल्म, उदर तथा अम्लपित्तको नष्ट करता है। तथा शरीरकी स्थूलताको कम करता है। इसमें सूखे शाक, जलन करनेवाले, खट्टे व कडुए पदार्थोंका सेवन न करना चाहिये। यह "परिणामशूलान्तक मण्डूर गुड" शूलार्तोंके ऊपर दया कर ताराने बताया था ॥ ३७-४३ ॥

राममण्डूरम्

वशिरं श्वेतवाट्यालं मधुपर्णी मयूरकम्।
तण्डुलीयं च कर्षांशं दत्त्वाधश्चोर्ध्वमेव च ॥ ४४ ॥
पाक्यं सुजीर्णं मण्डूरं गोमूत्रेण दिनद्वयम्।
अन्तर्बाष्पमदग्धं च तथा स्थाप्यं दिनत्रयम् ॥ ४५ ॥
विचूर्ण्य द्विगुणेनैव गुडेन सुविमर्दितम्।
भोजनस्यादिमध्यान्ते भक्ष्यं कर्षत्रिभागतः ॥ ४६ ॥
तक्रानुपानं वर्ज्यं च वार्क्षमम्लकमत्र तु।
अम्लपित्ते च शूले च हितमेतद्यथामृतम् ॥ ४७ ॥

चव्य, सफेद खरेटी, मौरेठी, अपामार्ग तथा चौराई प्रत्येक समान भाग ले कल्क कर आधा नीचे आधा ऊपर मध्यमें कल्कके बराकर मण्डूर और सबसे चतुर्गुण गोमूत्र छोड़ बन्द कर दो दिनतक मन्द आंचसे पकाना चाहिये। फिर ३ दिन ऐसे ही रखकर चूर्ण बनाना चाहिये। फिर द्विगुण गुड़ मिला विमर्दन कर रखना चाहिये। इसकी १ तोलाकी ३ खुराक बनाकर भोजनके आदि, मध्य व अन्तमें मट्ठेसे पीना चाहिये। इसमें वृक्षोंसे उत्पन्न खटाई नहीं खानी चाहिये। यह अम्लपित्त तथा शूलमें अमृतके तुल्य गुणदायक है * ॥ ४४-४७ ॥

रसमण्डूरम्

कुडवं पथ्याचूर्णं द्विपलं गन्धाश्म लोहकिट्टं च।
शुद्धरसस्यार्धपलं भृङ्गस्य रसं च केशराजस्य ॥ ४८ ॥
प्रस्थोन्मितं च दत्त्वा लौहे पात्रेऽथ दण्डसंघृष्टम्।
शुष्कं घृतमधुयुक्तं मृदितं स्थाप्यं च भाण्डके स्निग्धे
उपयुक्तमेतदचिरान्निहन्ति कफपित्तजान् रोगान्।
शूलं तथाम्लपित्तं ग्रहणीमपि कामलामुग्राम् ॥ ५० ॥

हर्र १६ तोला, शुद्ध गन्धक तथा मण्डूर प्रत्येक ८ तोला शुद्ध पारद २ तोला, भांगरेका रस तथा काले भांगरेका रस प्रत्येक १ प्रस्थ मिलाकर लोहेके खरलमें दण्डसे घोटना चाहिये। सूख जानेपर घी और शहद मिलाकर चिकने बर्तनमें रखना चाहिये। इसका प्रयोग करनेसे शीघ्र ही कफपित्त जन्यरोग, शूल, अम्लपित्त, ग्रहणी और भयंकर कामलारोग नष्ट होते हैं ॥ ४८-५० ॥

त्रिफलालौहम्

अक्षामलकशिवानां स्वरसैः पक्कं सुलोहजं चूर्णम्।
सगुडं यद्युपभुक्तं मुञ्चति सद्यस्त्रिदोषजं शूलम् ५१

बहेड़ा, आंवला तथा हर्रके स्वरस या क्वाथके साथ पकाया गया लौह भस्म गुड़के साथ खानेसे त्रिदोषज शूल नष्ट होता है ॥ ५१ ॥

लोहावलेहः

लौहस्य रजसो भागस्त्रिफलायास्तथा त्रयः।
गुडस्याष्टौ तथा भागा गुडामूत्रं चतुर्गुणम् ॥ ५२ ॥
एतत्सर्वं च विपचेद् गुडपाकविधानवित्।
लिहेच्च तद्यथाशक्ति क्षये शूले च पाकजे ॥ ५३ ॥

लौहभस्म १ भाग, त्रिफला ३ भाग, गुड़ ८ भाग, गोमूत्र ३२ भाग सबको मिला पाक करना चाहिये। सिद्ध हो जानेपर यथाशक्ति चाटना चाहिये। इससे क्षय तथा परिणाम शूल नष्ट होता है ॥ ५२ ॥ ५३ ॥

धात्रीलौहम्

धात्रीचूर्णस्याष्टौ पलानि चत्वारि लोहचूर्णस्य।
यष्टीमधुकरजश्च द्विपलं दद्यात्पटे घृतम् ॥ ५४ ॥

---

* बृहच्छतावरीमण्डूरम्—"शतावरीरसप्रस्थे प्रस्थे च सुरभीजले। अजायाःपयसःप्रस्थे प्रस्थे धात्रीरसस्य च॥ लौहकिट्ट पलान्यष्टौ शर्करायाश्च षोडश। दत्त्वाज्यकुडवं चैव पचेन्मृद्वग्निना शनैः॥ सिद्धशीते घटे नीते चूर्णानीमानि दापयेत्। विडङ्ग-त्रिफलाव्योषयमानीगजपिप्पलीः॥ द्विजीरकघनानां च श्लक्ष्णान्यक्षसमानि च। खादेदग्निबलापेक्षी भोजनादौ विचक्षणः॥ निहन्ति पंक्तिशूलं च अम्लपित्त सुदारुणम्। रक्तपित्तं च शूलं च पाण्डुरोगं हलीमकम्॥" शतावरीका रस १ सेर ९ छ० ३ तोला, गोमूत्र १ सेर ९ छ० तोला, बकरीका दूध १ सेर ९ छ० ३ तोला, आंवलेका रस १ सेर ९ छ० ३ तोला लोहकिट्ट (मण्डूर) ३२ तोला, शक्कर ६४ तोला, तथा घी ३२ तो० सब एकमें मिलाकर मन्द आंचसे पकाना चाहिये। तैयार हो जानेपर उतार ठण्ढा कर वायविडंग, त्रिफला, त्रिकटु, अजवाइन, गजपीपल, दोनों जीरा, तथा नागरमोथा प्रत्येक एक तोलाका चूर्ण छोड़कर अग्निबलके अनुसार भोजनके आदिमें इसे खाना चाहिये। यह कठिन परिणामशूल, अम्लपित्त, रक्तपित्त, शूल, पाण्डुरोग और हलीमकको नष्ट करता है। सामान्य मात्रा ४ रत्तीसे १ माशेतक।

अमृताक्वाथेनैतच्चूर्णं भाव्यं च सप्ताहम् ।
चण्डातपेषु शुष्कं भूयः पिष्ट्वा नवे घटे स्थाप्यम्॥५५॥
घृतमधुना सह युक्तं भुक्त्यादौ मध्यतस्तथान्ते च ।
त्रीनपि वारान्खादेत्पथ्यं दोषानुबन्धेन ॥ ५६ ॥
भक्तस्यादौ नाशयति व्याधीन्पित्तानिलोद्भवान्सद्यः
मध्येऽन्नविष्टम्भं जयति नृणां संविदह्यते नान्नम्॥५७॥
पानान्नकृतान् रोगान्भुक्त्यन्ते शीलितं जयति ।
एवं जीर्यति चान्ने निहन्ति शूलं नृणां सुकष्टमपि॥५८॥
हरति सहसा युक्तो योगश्चायं जरत्पित्तम् ।
चक्षुष्यः पलितघ्नः कफपित्तसमुद्भवाञ्जयेद्रोगान् ।
प्रसादयत्यपि रक्तं पाण्डुत्वं कामलां जयति ॥५९॥

आंवलेका चूर्ण ३२ तोला, लौहभस्म १६ तोला, तथा मोरेठीका चूर्ण ८ तोला सबको एकमें मिलाकर गुर्चके क्वाथकी सात दिनतक भावना देनी चाहिये। फिर कड़ी धूपमें सुखाय घोटकर नये घटमें रखना चाहिये। फिर घी और शहदके साथ भोजनके आदि, मध्य तथा अन्तमें इस रीतिसे प्रतिदिन तीन बार बलानुसार खाना चाहिये। पथ्य दोषोंके अनुसार लेना चाहिये। भोजनके पहिले खानेसे पित्त, वातजन्य रोगोंको शीघ्र ही नष्ट करता है। मध्यमें अन्नके विबन्धको नष्ट कर पचाता है। भोजनके अन्तमें सेवन करनेसे अन्नपानके दोषोंको नष्ट करता है। ऐसेही परिणामशूल तथा अन्नद्रव नामक शूलको भी नष्ट करता है। नेत्रोंको लाभ पहुँचाता, बालोंको काला करता, कफ तथा पित्तज रोगोंको शान्त करता और रक्तको शुद्ध करता तथा पाण्डुरोग और कामलाको नष्ट करता है॥ ५४–५९॥

लौहामृतम्

तनूनि लोहपत्राणि तिलोत्सेधसमानि च ।
कशिकामूलकल्केन संलिप्य सार्षपेण वा ॥६०॥
विशोष्य सूर्यकिरणैः पुनरेवावलेपयेत् ।
त्रिफलाया जले ध्मातं वापयेच्च पुनः पुनः ॥६१॥
ततः संचूर्णितं कृत्वा कर्पटेन तु छानयेत् ।
भक्षयेन्मधुसर्पिभ्यां यथाग्न्येतत्प्रयोगतः ॥६२॥
माषकं त्रिगुणं वाथ चतुर्गुणमथापि वा ।
छागस्य पयसः कुर्यादनुपानमभावतः ॥ ६३ ॥
गवां श्रृतेन दुग्धेन चतुः षष्टिगुणेन च ।
पक्तिशूलं निहन्त्येतन्मासेनैकेन निश्चितम् ॥६४॥
लौहामृतमिदं श्रेष्ठं ब्रह्मणा निर्मितं पुरा ।
ककारपूर्वकं यच्च यच्चाम्लं परिकीर्तितम् ॥६५॥
सेव्यं तन्न भवेदत्र मांसं चानूपसम्भवम् ।

तिलके समान पतले लोहेके पत्रोंको कशिका (एक प्रकार चापर घास नामसे प्रसिद्ध) की जड़के कल्कसे अथवा सरसोंके कल्कसे लिप्त कर फिर धूपमें लेप सूख जानेपर दूसरी बार सरसोंके कल्कसे लेप कर सुखाना चाहिये। फिर तपा तपा कर त्रिफलाके क्वाथसे बुझाना चाहिये। फिर चूर्ण कर कपड़ेसे छान लेना चाहिये। फिर इसे अग्निके अनुसार शहद व घी साथ खाना चाहिये। १ माशा, ३ माशा अथवा ४ माशा तक, ऊपरसे लौहसे ६४ गुना बकरीका दूध अथवा गायका दूध गरम कर गुनगुना पीना चाहिये। यह एक महीनेमें परिणामशूलको नष्ट करता है। इसे ब्रह्माने सर्व प्रथम बनाया था। इसके सेवनमें ककारादि नामवाले द्रव्य तथा अम्ल पदार्थ व जलप्राय प्रदेशके प्राणियोंके मांसको न खाना चाहिये॥ ६०–६५॥

खण्डामलकी

स्विन्नपीडितकूष्माण्डात्तुलार्धं भृष्टमाज्यतः॥६६॥
प्रस्थार्धे खण्डतुल्यं तु पचेदामलकीरसात् ।
प्रस्थे सुस्विन्नकूष्माण्डरसप्रस्थे विघट्टयन् ॥६७॥
दर्व्या पाकं गते तस्मिंश्चूर्णीकृत्य विनिक्षिपेत् ।
द्वे द्वे पले कणाजाजीशुण्ठीनां मरिचस्य च ॥६८॥
पलं तालीसधन्याकचातुर्जातकमुस्तकम् ।
कर्षप्रमाणं प्रत्येकं प्रस्थार्धं माक्षिकस्य च ॥ ६९ ॥
पक्तिशूलं निहन्त्येतद्दोषत्रयभवं च यत् ।
छर्द्यम्लपित्तमूर्च्छाश्च श्वासकासावरोचकम् ॥७०॥
हृच्छूलं रक्तपित्तं च पृष्ठशूलं च नाशयेत् ।
रसायनमिदं श्रेष्ठं खण्डामलकसंज्ञितम् ॥ ७१ ॥

उबालकर निचोया गया कूष्माण्ड २॥ सेर, घी ६४ तो० छोड़कर भूनना चाहिये। फिर इसमें २॥ सेर मिश्री १२८ तो० आंवलेका रस, तथा १२८ तो० उबाले हुए कूष्माण्डका स्वरस मिलाकर पकाना चाहिये। पाक सिद्ध हो जानेपर छोटी पीपल, जीरा तथा सोंठ, प्रत्येक ८ तोला, काली मिर्च ४ तोला, तालीशपत्र, धनियां, दालचीनी, तेजपात, इलायची, नागकेशर, व नागरमोथा प्रत्येक १ तोला तथा ठण्ढा होनेपर शहद ६४ तोला मिलाकर रखना चाहिये। यह त्रिदोषजन्य परिणामशूल, वमन, अम्लपित्त, मूर्च्छा श्वास, कास, अरुचि, हृदयके दर्द, रक्तपित तथा पीठके शूलको नष्ट करता है। यह "खंडामलक" श्रेष्ठ रसायन है॥ ६६–७१॥

नारिकेलखण्डः

कुडवमितमिह स्यान्नारिकेलं सुपिष्टं
पलपरिमितसर्पिःपाचितं खण्डतुल्यम् ।
निजपयसि तदेतत्प्रस्थमात्रे विपक्वं
गुडवदथ सुशीते शाणभागान्क्षिपेच्च ॥ ७२ ॥
धन्याकपिप्पलिपयोदतुगाद्विजीराव-
शाणं त्रिजातमिभकेशरवह्निचूर्ण्य ।

हन्त्यम्लपित्तमरुचिं क्षयमस्रपित्तं
शूलं वमिं सकलपौरुषकारि हारि ॥ ७३ ॥

अच्छी तरह पिसा हुआ कच्चा नारियलका गूदा १६ तोला ४ तोला घीमें भूना चाहिये, सुगन्ध उठने लगनेपर बराबर मिश्री तथा नारियलका जल १२८ तो० मिलाकर पकाना चाहिये । अवलेह तैयार हो जानेपर उतार ठंडा कर धनियां, छोटी पीपल, नागरमोथा, वंशलोचन, सफेद जीरा तथा स्याह जीरा प्रत्येक ३ माशे तथा दालचीनी, तेजपात, इलायची, नागकेशर प्रत्येक ६ रत्तीका चूर्ण मिलाकर सेवन करनेसे अम्लपित्त, अरुचि, क्षय, रक्तपित्त, शूल, वमन नष्ट होते हैं तथा पुरुषत्व बढ़ता है ॥ ७२ ॥ ७३ ॥

कलायचूर्णादिगुटी

कलायचूर्णभागौ द्वौ लोहचूर्णस्य चापरः ।
कारवेल्लपलाशानां रसेनैव विमर्दितः ॥ ७४ ॥
कर्षमात्रां ततश्चैकां भक्षयेद् गुटिकां नरः ।
मण्डानुपानात्सा हन्ति जरत्पित्तं सुदारुणम् ॥ ७५ ॥

मटरका चूर्ण २ भाग, लौहभस्म १ भाग वर्तमान समयके लिये १ माशाकी वटी पर्य्याप्त होगी। भाग दोनोंको करेलेके पत्तेके रससे घोटकर १ तोलेकी गोली बना लेनी चाहिये । यह मण्डके अनुपानके साथ सेवन करनेसे जरत्पित्तको शान्त करती है ॥ ७४ ॥ ७५ ॥

त्रिफलायोगौ

लिह्याद्वा त्रैफलं चूर्णमयश्चूर्णसमन्वितम् ।
यष्टीचूर्णेन वा युक्तं लिह्यात्क्षौद्रेण तद्द्रवे ॥ ७६ ॥

(१) अथवा त्रिफलाका चूर्ण लौह भस्मके साथ अथवा (२) मौरेठीके चूर्णके साथ शहद मिलाकर चाटनेसे जरत्पित्त शान्त होता है ॥ ७६ ॥

अन्नद्रवशूलचिकित्सा

पित्तान्तं वमनं कृत्वा कफान्तं च विरेचनम् ।
अन्नद्रवे च तत्कार्यं जरत्पित्ते यदीरितम् ॥ ७७ ॥
आमपक्वाशये शुद्धे गच्छेदन्नद्रवः शमम् ।

पित्तान्त वमन व कफान्त विरेचन करनेके अनन्तर जरत्पित्तकी जो चिकित्सा बतायी गयी, वह अन्नद्रव शूलमें भी करनी चाहिये । आमाशय व पक्वाशव शुद्ध हो जाने पर अन्नद्रवशूल शान्त हो जाता है ॥ ७७ ॥–

विविधा योगाः

माषेण्डरी सतुषिका स्विन्ना सर्पिर्युता हिता ॥ ७८ ॥
गोधूममण्डकं तत्र सर्पिषा गुडसंयुतम् ।
ससितं शीतदुग्धेन मृदितं वा हितं मतम् ॥ ७९ ॥
शालितण्डुलमण्डं वा कवोष्णं सिक्थवर्जितम् ।
वाट्यं क्षीरेण संसिद्धं घृतपूरं सशर्करम् ॥ ८० ॥
शर्करां भक्षयित्वा वा क्षीरमुत्क्वथितं पिबेत् ।
पटोलपत्त्रयूषेण खादेच्चणकसक्तुकान् ॥ ८१ ॥

विना छिल्का निकाली उडदकी पिट्ठीके बड़े घीमें पकाकर खाना चाहिये । अथवा गेहूंका मण्ड घी व गुड़ मिलाकर खाना चाहिये । अथवा मिश्री व ठण्ढा दूध मिलाकर खाना चाहिये । अथवा शाली चावलोंका मण्ड कुछ गरग गरम सीथ रहित अथवा यवका मण्ड दूध, घी व शक्कर मिलाकर पीना चाहिये । शक्कर खाकर ऊपरसे गरम दूध पीना चाहिये । अथवा परवलके पत्तेके यूषके साथ चनाके सत्तुओंको खाना चाहिये ॥ ७८–८१ ॥

पथ्यविचारः

अन्नद्रवे जरत्पित्ते वह्निर्मन्दो भवेद्यतः ।
तस्मादत्रान्नपानानि मात्राहीनानि कल्पयेत् ॥ ८२ ॥

अन्नद्रव तथा जरत्पित्तमें अग्नि मन्द हो जाती है । अतः इसमें अन्नपान आदि सब पदार्थोंको अल्पमात्रामें ही देना उचित है ॥ ८२ ॥

इति परिणामशूलाधिकारः समाप्तः ।

अथोदावर्ताधिकारः

सामान्यक्रमः

त्रिवृत्सुधापत्रतिलादिशाक-
ग्राम्यौदकानूपरसैर्यवान्नम् ।
अन्यैश्च सृष्टानिलमूत्रविड्भि-
र्द्यात्प्रसन्नागुडसीधुपायी ॥ १ ॥

निसोथ, सेहुण्डके पत्ते, व तिल आदिके शाक तथा ग्राम्य, आनूप जलमें रहनेवाले प्राणियोंके मांसरस तथा मल मूत्र व वायुको शुद्ध करनेवाले दूसरे पदार्थोंके साथ यवका दलिया तथा रोटी आदि खाना चाहिये और शरावका स्वच्छ भाग अथवा गुड़से बनाया गया सीधु पीना चाहिये ॥ १ ॥

कारणभेदेन चिकित्साभेदः

आस्थापनं मारुतजे स्निग्धस्विन्नस्य शस्यते ।
पुरीषजे तु कर्तव्यो विधिरानाहिकश्च यः ॥ २ ॥
क्षारवैतरणौ बस्ती युञ्ज्याच्चात्र चिकित्सकः ।

वातजन्य उदावर्तमें स्नेहन स्वेदनके अनन्तर आस्थापन बस्ति देना चाहिये । मलावरोधसे उत्पन्न उदावर्तमें आनाह नाशकी चिकित्सा करनी चाहिये । तथा क्षार बस्ति और वैतरणबस्ति (आस्थापनका भेद) देना चाहिये ॥ २ ॥

श्यामादिगणः

श्यामा दन्ती द्रवन्तीत्वङ्महाश्यामा स्नुहीत्रिवृत् ३
सप्तला शंखिनी श्वेता राजवृक्षः सतिल्वकः ।
कम्पिल्लकं करञ्जश्च हेमक्षीरीत्ययं गणः ॥ ४४ ॥
सर्पिस्तैलरजःक्वाथकल्केष्वन्यतमेषु च ।
उपावर्तोदरानाहविषगुल्मविनाशनः ॥ ५ ॥

काला निसोथ, दन्ती, द्रवन्ती (दन्तीभेद) की छाल, विधारा, थूहर, सफेद निसोथ, समला (सेहुण्डका भेद) कालादाना, सफेद विष्णुक्रान्ता, अमलतासका गूदा, पठानी लोध, कवीला, कञा तथा हेमशीरी (इसे सत्यानाशी तथा भड़भांड़ भी कहते हैं) इन औषधियोंके साथ घृत अथवा तैलका पाक करके अथवा इन औषधियोंका चूर्ण, क्वाथ अथवा कल्क आदि किसी प्रकार सेवन करनेसे उदावर्त, उदररोग, आनाह, विष और गुल्म नष्ट होता है ॥ ३–५ ॥

त्रिवृतादिगुटिका

त्रिवृ कृष्णाहरीतक्यो द्विचतुष्पञ्चभागिकाः ।
गुडिका गुडतुल्यास्ता विड्विबन्धगदापहाः ॥६॥

निसोथ २ भाग, छोटी पीपल ४ भाग, बड़ी हर्रका छिल्का ५ भाग कूट छान सबके बराबर गुड़ मिलाकर गोली बना लेनी चाहिये । यह मलकी रुकावटको नष्ट करती है ॥ ६ ॥

हरितक्यादिचूर्णम्

हरीतकीयवक्षारपीलूनि त्रिवृता तथा ।
घृतैश्चूर्णमिदं पेयमुदावर्तविनाशनम् ॥ ७ ॥

बड़ी हर्रका छिल्का, यवाखार, पीलु तथा निसोथ समान भाग ले चूर्ण बनाकर घीके साथ खानेसे उदावर्त नष्ट होता है ॥ ७ ॥

हिंग्वादिचूर्णम्

हिंगुकुष्ठवचासर्जि विडं चेति द्विरुत्तरम् ।
पीतं मद्येन तच्चूर्णगुदावर्तहरं परम् ॥ ८ ॥

भुनी हींग १ भाग, कूठ २ भाग, वच ४ भाग, सज्जीखार ८ भाग तथा विडनमक १६ भाग ले चूर्ण बनाकर शराबके साथ पीनेसे उदावर्तरोग निःसन्देह नष्ट होता है ॥८॥

नाराचचूर्णम्

खण्डपलं त्रिवृता सममुपकुल्याकर्षचूर्णितं श्लक्ष्णम
प्राग्भोजने च समधु विडालपदकं लिहेत्प्राज्ञः॥९॥
एतद्गाढपुरीषे पित्ते कफे च विनियोज्यम् ।
सुस्वादुर्नृपयोग्योऽयं योगो नाराचको नाम्ना॥१०॥

मिश्री ४ तोला, निसोथ ४ तोला छोटी पीपल १ तोला इन ओषधियोंका महीन चूर्ण कर भोजनके पहिले १ तोलाकी मात्रा शहदके साथ चाटनी चाहिये । इसका कड़े दस्तोंके आनेमें तथा पित्त और कफजन्य उदावर्तमें प्रयोग करना चाहिये । यह मीठा योग राजाओंके योग्य है । इसे "नाराचचूर्ण" कहते हैं ॥ ९ ॥ १० ॥

लशुनप्रयोगः

रसोनं मद्यसंमिश्रं पिबेत्प्रातः प्रकाङ्क्षितः ।
गुल्मोदावर्तशूलघ्नं दीपनं बलवर्धनम ॥ ११ ॥

प्रातःकाल भूख लगनेपर शुद्ध लहसुनको मद्यके साथ मिलाकर पीवे । यह गुल्म, उदावर्त व शूलको नष्ट करता, अग्नि दीप्त करता तथा बलको बढ़ाता है ॥ ११ ॥

फलवर्तयः

हिङ्गुमाक्षिकसिन्धूत्थैः पक्त्वा वर्तिं सुनिर्मिताम् ।
घृताभ्यक्तां गुदे दद्यादुदावर्तविनाशिनीम् ॥ १२ ॥
मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः ।
गुडक्षारसमायुक्ताः फलवर्तिः प्रशस्यते ॥ १३ ॥
आगारधूमसिन्धूत्थतैलयुक्ताम्लमूलकम् ।
क्षुण्णं निर्गुण्डिपत्रं वा स्विन्ने पायौ क्षिपेद् बुधः१४

हींग, शहद व सेंधानमकको पकाकर बनायी गयी बत्ती घी चुपरकर गुदामें रखनेसे उदावर्त नष्ट होता है । इसी प्रकार मैनफल, छोटी पीपल, कूठ, दूधिया बच व सफेद-सर्सों महीन पीस गुड़ और क्षार मिलाकर बनायी गयी बत्ती भी उत्तम है । अथवा गृहधूम, सेंधानमक तथा तैलके साथ उठायी गयी खट्टी मूलीकी बत्ती अथवा केवल सम्भालूकी पत्तीके कल्ककी बत्ती गुदाका स्वेदन कर गुदामें रखनी चाहिये ॥ १२--१४ ॥

मूत्रजोदावर्तचिकित्सा

सौवर्चलाढ्यां मदिरां मूत्रे त्वभिहते पिबेत् ।
एलां वाप्यथ मद्येन क्षीरं वारि पिबेच्च सः ॥१५॥
दुःस्पर्शास्वरसं वापि कषायं ककुभस्य च ।
एवारुबीजं तोयेन पिबेद्वा लवणीकृतम् ॥ १६ ॥
पञ्चमूलीश्रृतं क्षीरं द्राक्षारसमथापि वा ।
सर्वथैवोपयुञ्जीत मूत्रकृच्छ्राश्मरीविधिम् ॥ १७ ॥

मूत्रकी रुकावटसे उत्पन्न उदावर्तमें काला नमक छोड़कर शराब पीना चाहिये । अथवा छोटी इलायचीका चूर्ण शराबके साथ अथवा जल व दूध एकमें मिलाकर पीना चाहिये । अथवा यवासाका स्वरस अथवा अर्जुनकी छालका क्वाथ अथवा ककड़ीके बीज पानीमें पीस लवण मिलाकर पीना चाहिये । अथवा पञ्चमूलसे सिद्ध दूध अथवा मुनक्केका रस पीना चाहिये। तथा मूत्रकृच्छ्र व अश्मरीनाशक विधिका सर्वथा सेवन करना चाहिये ॥ १५--१७ ॥

जृम्भजाद्युदावर्तचिकित्सा

स्नेहस्वेदैरुदावर्तं जृम्भजं समुपाचरेत् ।
अश्रुमोक्षोऽश्रुजे कार्यस्स्वप्नो मद्यं प्रियाःकथाः १८॥
क्षवजे क्षवपत्रेण घ्राणस्थेनानयेत्क्षवम् ।
तथोर्ध्वजत्रगोऽभ्यङ्गः स्वेदो धूमःसनावनः ॥१९॥

हितं वातघ्नमद्यं च घृतं चौत्तरभक्तिकम् ।
उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत् ॥ २० ॥
छर्द्याघातं यथादोषं नस्यस्नेहादिभिर्जयेत् ।
भुक्त्वा प्रच्छर्दनं धूमो लंघनं रक्तमोक्षणम् ॥२१॥
चन्द्रग्रहणमें विधिपूर्वक मयूरशिखाकी जड़ उखाड़ कमर या गर्दनमें बान्धनेसे अहिंडिका रोग अवश्य नष्ट होता हैं । इसी प्रकार सप्तपर्णके फूल, काली मिर्च व गोरोचनको पीसकर दूधके साथ पिलाना चाहिये । अथवा चावलमें भातकी जली पिट्ठी पीसकर दूध व शहद मिलाकर पिलाना चाहिये । इसी प्रकार शृगालकी नाक, कौएकी जिह्वा, शूकरकी नाभि, कांसा, पारद और सर्पविष तथा बर्साती मेढककी बामजंघाकी हड्डी, सब एकमें मिलाकर गर्दन या कमर आदिमें बांधना अहिंडिका शान्त करता है । इसमें अभ्यङ्ग या पथ्यविधि विशेष नहीं है ॥ ६-९ ॥

अनामकचिकित्सा

अनामके घुघुंरिकावुक्कामरिचरोचनाः ।
नवनीतं च संमिश्य खादेत्तद्रोगनाशनम् ॥१०॥
तैलाक्तशिरस्तालुनि सप्तदलार्कस्नुहीभवं क्षीरम् ।
दत्त्वा रजनीचूर्णं दत्ते नश्येदनामको रोगः ॥११॥
लेहयेच्च शुना बालं नवनीतेन लेपितम् ।
स्फुटकपत्रजरसोद्वर्तनं च हि तद्धितम् ॥ १२ ॥

अतामकमें घुर्घुरिका (कीट) के आगेका मांस, काली मिर्च, गोरोचन और मक्खन मिलाकर खानेसे यह रोग नष्ट होता है ।शिरमें तालुपरतैल चुपर सप्तदल, आक और सेहुण्डके

दूधको लगाकर ऊपरसे हल्दीका चूर्ण उर्रानेसे अनामक रोग नष्ट होता है। बालकके शरीरमें मक्खनका लेप कर कुत्तेसे चटाना चाहिये ॥ १०-१२ ॥

अनामकहरं तैलम्

तैलस्य भागमेकं मूत्रस्य द्वौ च शिम्बिदलरसस्य।
गव्यं पयश्चतुर्गुणमेवं दत्त्वा पचेत्तैलम्।
तैलाभ्यंगः सततं रोगमनामकाख्यमपहरति ॥१३॥

एक भाग तैल, २ भाग गोमूत्र, २ भाग सेमकी पत्तीका रस, ४ भाग गोदुग्ध छोड़कर तैल पकाना चाहिये। इससे सदा मालिश अनामक रोग नष्ट करती है ॥ १३ ॥

कज्जलम्

आर्कं तूलकमाविकरोमाण्यादाय केशराजस्य।
स्वरसेनाक्तं वस्त्रे कृत्वा वर्तिं च तैलाक्ताम् ॥१४॥
तज्जातकज्जलाञ्जितलोचनयुगलोऽप्यलंकृतो बालः।
कष्टमनामकरोगं क्षपयति भूतादिकं चापि ॥१५॥

आककी रुई व भेड़के बाल ले भांगरेके रसमें तर कर सुखा बत्ती बना तेलमें डुबोकर जलाना चाहिये। इससे बनाये गये काजलको बालककी आँखोंमें लगानेसे अनामकरोग तथा भूतादि बाधा शान्त होती हैं ॥ १४ ॥ १५ ॥

अपरे प्रयोगाः

चालनिकातलसंस्थितपोतं संप्लाव्य गव्यमूत्रेण।
ओकोदशालिकायां रजकक्षारोदकस्नानम् ॥१६॥
दासक्रयणश्रावणवराटिका रसेन्द्रपूरिता धृता कण्ठे
नलिनीदले च शयनं सुकष्टमनामकाख्यरोगघ्नम् ॥१७

लड़केको धोबीके पाटेपर खड़ा कर चलनेसे गोमूत्र छोड़कर स्नान कराना चाहिये। फिर धोबीके क्षार मिश्रित जलसे स्नान कराना चाहिये। इसी प्रकार नौकर द्वारा खरीदी गयी किसी योगी या पाखण्डीके पासकी कौड़ी पारद भरकर गलेमें बांधनेसे अथवा कमलके पत्तोंकी शय्यापर सुलानेसे अनामकरोग दूर होता है ॥ १६ ॥ १७ ॥

सामान्यमात्राः

भैषज्यं पूर्वमुद्दिष्टं नराणां यज्ज्वरादिषु।
देयं तदेव बालानां मात्रा तस्य कनीयसी ॥ १८ ॥
प्रथमे मासि जातस्य शिशोर्भेषजरक्तिका।
अवलेह्या तु कर्तव्या मधुक्षीरसिताघृतैः ॥ १९ ॥
एकैकां वर्धयेत्तावद्यावत्संवत्सरो भवेत्।
तदूर्ध्वं माषवृद्धिः स्याद्यावद्वाषोडशाब्दिकाः ॥२०

मनुष्योंके लिये ज्वरादिकोंमें जो ओषधियां बतायी गयी हैं वही बालकोंको देना चाहिये। पर मात्रा छोटी रहे। पहिले महीनेमें १ रत्ती औषधि शहद, दूध, घी व मिश्रीसे पतली कर पिलाना चाहिये। महीनेकी वृद्धिके साथ साथ औषध मात्रा भी एक एक रत्ती प्रतिमास बढाना चाहिये। सालभरतक यही क्रम रखनेके अनन्तर फिर प्रति वर्ष १ माशा सोलह वर्षतक बढाना चाहिये* ॥ १८-२० ॥

हरिद्रादिक्वाथः

हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः।
शिशोर्ज्वरातिसारघ्नः कषायस्स्तन्यदोषजित् ॥२१॥

हल्दी, दारुहल्दी, मौरेठी, कटेरी व इन्द्रयवका क्वाथ बालकोंके ज्वरातिसारको नष्ट करता तथा स्तन्य दोषको जीतता है ॥ २१ ॥

चातुर्भद्रचूर्णम्

घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतम्।
शिशोर्ज्वरातिसारघ्नं कासश्वासवमीहरम् ॥ २२ ॥

नागरमोथा, छोटी, पीपर, मजीठ व काकड़ासिंगीका चूर्ण शहदके साथ बालकको देनेसे ज्वरातिसारको नष्ट करता तथा कास, श्वास व वमनको शान्त करता है ॥ २२ ॥

धातक्यादिलेहः

धातकीबिल्वधन्याकलोध्रेन्द्रयववालकैः।
लेहः क्षौद्रेण बालानां ज्वरातीसारवान्तिजित् ॥२३॥

धायके फूल, बेल, धनियां लोध व इन्द्रयवसे बनाया गया लेह शहदके साथ बालकोंके ज्वरातिसार और वमनको शांत करता है ॥ २३ ॥

रजन्यादिचूर्णम्

रजनीदारुसरलश्रेयसीबृहतीद्वयम्।
पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा ॥२४॥
ग्रहणीदीपनं हंति मारुतार्तिं सकामलाम्।
ज्वरातिसारपाण्डुघ्नं बालानां सर्वशोथनुत् ॥२५॥

हल्दी, देवदारु, सरल, धूप, गजपीपल, छोटी कटेरी, बड़ी कटेरी, पिठिवन और सौंफके चूर्णको शहद व घीके साथ चाटनेसे बालकोंकी ग्रहणी दीप्त होती, वायुकी पीड़ा, कामला, ज्वरातिसार, पांडु और समस्त शोथ नष्ट होते हैं ॥ २४ ॥ २५ ॥

---

* जवान पुरुषके लिये किसी औषधकी जितनी मात्रा हो सकती है, उससे $\frac{1}{152}$ भाग १ मासके बालकको $\frac{1}{?}$ भाग २ मासके बालकको $\frac{1}{64}$ भाग ३ मासके बालकको $\frac{1}{?}$ भाग चार मासके लिये इसी प्रकार बढाते हुए $\frac{1}{16}$ भाग, एक वर्षवालेके लिये $\frac{1}{?}$ भाग २ वर्षवालेके लिये इसी प्रकार बढाते हुए १६ वर्षमें पूर्ण मात्रा देनी चाहिये ॥

मिश्यादिलेहः

मिशी कृष्णाञ्जनं लाजा शृङ्गीमरिचमाक्षिकैः ।
लेहः शिशोर्विधातव्यश्छर्दिकासज्वरापहः ॥२६॥

सौंफ, काला सुरमा, खील, काकड़ाशिंगी, काली मिर्च व शहदका लेह बालकोंकी वमन, खांसी और ज्वरको नष्ट करता है ॥ २६ ॥

शृङ्गयादिलेहः

शृङ्गीं समुस्तातिविषां विचूर्ण्य
लेहं विदध्यान्मधुना शिशूनाम् ।
कासज्वरच्छर्दिभिरर्दितानां
समाक्षिकां चातिविषां तथैकाम् ॥ २७ ॥

काकड़ासिंही, अतीस व नागरमोथाका चूर्णकर शहदके साथ अथवा अकेले अतीस शहदके साथ चटानेसे बालकोंकी खांसी, ज्वर और वमन शांत होती है ॥ २७ ॥

छर्दिचिकित्सा

पीतं पीतं वमेद्यस्तु स्तन्यं तन्मधुसर्पिषा ।
द्विवार्ताकीफलरसं पञ्चकोलं च लेहयेत् ॥ २८ ॥
आम्रास्थिलाजसिन्धूत्थैर्लेहः क्षौद्रेण छर्दिनुत् ॥२९॥
पिप्पलीमरिचानां तु चूर्णं समधुशर्करम् ।
रसेन मातुलुङ्गस्य हिक्काच्छर्दिनिवारणम् ॥ ३० ॥

जो बालक दूध पीकर वमन कर देता है, उसे छोटी बड़ी कटेरीके फलोंका रस व पञ्चकोलका चूर्ण शहद व घी मिलाकर पिलाना चाहिये । इसी प्रकार आमकी गुठली, खील व सेंधानमकका चूर्ण शहदके साथ चटानेसे वमन शान्त करता है । तथा छोटी पीपल व काली मिर्चका चूर्ण शहद, शक्कर और बिजौरे निम्बूके रसके साथ हिक्का और वमनको शान्त करता है ॥ २८-३० ॥

पेट्यादिपिण्डः

पेटीपाठामूलजम्बूत्वक्सहकारवल्कलतः कल्कः ।
इत्येकशश्च पिण्डो विधृतो हृन्नाभिमध्यताल्वादौ ।
छर्द्यतीसारजवेगं प्रबलं धत्ते तदेव नियमेन ॥३१॥

पेटी (पाढल) की जड़, पाढकी जड़, जामुनकी व आमकी छालका एक गोला बनाकर हृदय व नाभिके बीचमें तथा तालुपर घुमानेसे निःसन्देह प्रबल वमन और अतीसारका वेग शांत होता है ॥ ३१ ॥

बिल्वादिक्काथः

बिल्वं च पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्काथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥ ३२ ॥

बेलका गूदा, धायके फूल, सुगन्धवाला, लोध व गजपीपलका क्काथ या अवलेह शहद मिलाकर पिलानेसे बालकोंके दस्त बन्द होते हैं ॥ ३२ ॥

समङ्गादिक्काथः

समङ्गाधातकीलोध्रशारिवाभिः शृतं जलम् ।
दुर्धरेऽपि शिशोर्देयमतीसारे समाक्षिकम् ॥ ३३ ॥

लज्जालुके बीज, धायके फूल, लोध, व शारिवासे सिद्ध क्काथको शहदके साथ बालकोंके कठिन अतिसारमें देना चाहिये ॥ ३३ ॥

नागरादिक्काथः

नागरातिविषामुस्तावालकेन्द्रयवैः शृतम् ।
कुमारं पाययेत्प्रातः सर्वातिसारनाशनम् ॥ ३४ ॥

सोंठ, अतीस, नागरमोथा, सुगन्धवाला व इन्द्रयवके क्वाथको प्रातःकाल पिलानेसे समस्त अतीसार नष्ट होते हैं ॥ ३४ ॥

समङ्गादियवागूः

समङ्गा धातकी पद्मं वयस्था कच्छुरा तथा ।
पिष्टैरेतैर्यवागूः स्यात्सर्वातीसारनाशिनी ॥ ३५ ॥

लज्जालुके बीज, धायके फूल, कमल, बच व कौंचके बीजको पीसकर बनायी गयी यवागू सब अतीसारोंको नष्ट करती है ॥ ३५ ॥

लाजायोगः

बिल्वमूलकषायेण लाजाश्चैव सशर्कराः ।
आलोड्य पाययेद्बालं छर्द्यतीसारनाशनम् ॥ ३६ ॥

बेलकी जड़के काढ़ेके साथ खील व शक्कर मिलाकर बालकको पिलानेसे सब अतीसार नष्ट होते हैं ॥ ३६ ॥

प्रियङ्ग्वादिकल्कः

कल्कः प्रियंगुकोलास्थिमध्यमुस्तरसाञ्जनैः ।
क्षौद्रलीढः कुमारस्य छर्दितृष्णातिसारनुत् ॥३७॥

प्रियंगु, बेरकी गुठलीकी मींगी, नागरमोथा व रसौंतके कल्कको शहदमें मिलाकर चाटनेसे बालककी प्यास, वमन तथा दस्त नष्ट होते हैं ॥ ३७ ॥

रक्तातिसारप्रवाहिकाचिकित्सा

मोचरसः समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥ ३८ ॥
लेहस्तैलसिताक्षौद्रतिलयष्टयाह्वकल्कितः ।
बालस्य रुन्ध्याभियतं रक्तस्रावं प्रवाहिकाम् ॥३९॥

लाजा सयष्टीमधुकं शर्कराक्षौद्रमेव च ।
तण्डुलोदकसंसिक्तं क्षिप्रं हन्ति प्रवाहिकाम् ॥४०॥

मोचरस, लज्जालु, धायके फूल व कमलके केशरको पीसकर बनायी गयी यवागू रक्तातीसारको नष्ट करती है । तथा तेल, मिश्री, शहद, तिल, व मौरेठीका कल्क मिलाकर बनाया गया लेह नियमसे रक्तस्राव और प्रवाहिकाको नष्ट करता है । इसी प्रकार खील, मौरेठी, शक्कर व शहदके कल्कको चावलके जलके साथ पीनेसे शीघ्रही प्रवाहिका नष्ट होती है ॥ ३८-४० ॥

ग्रहण्यतीसारनाशका योगाः

अङ्कोटमूलमथवा तण्डुलसलिलेन वटजमूलं वा ।
पीतं हन्त्यतिसारं ग्रहणीरोगं सुदुर्वारम् ॥ ४१ ॥
सितजीरकसर्जचूर्णं बिल्वदलोत्थाम्बुमिश्रितं पीतम् ।
हन्त्यामरक्तशूलं गुडसहितः श्वेतसर्जो वा ॥ ४२ ॥
मरिचमहौषधकुटजं द्विगुणीकृतमुत्तरोत्तरं क्रमशः ।
गुडतक्रयुक्तमेतद् ग्रहणीरोगं निहन्त्याशु ॥ ४३ ॥

अकोहरकी जड़ अथवा बरगदकी जड़को पीस चावलकेजलके साथ पीनेसे अतीसार और ग्रहणी नष्ट होती है,तथा सफेद जीरा और रालके चूर्णको बेलकी पत्तीके रसमें मिलाकर अथवा गुड़के साथ सफेद रालके चूर्णको खानेसे आमरक्त और शूल शान्त होता है । अथवा काली मिर्च १ भाग, सोंठ २ भाग, व कुरैया ४ भाग इनके चूर्णको गुड़ और मट्ठेमें मिलाकर पीनेसे ग्रहणीरोग शान्त होता है ॥ ४१-४३ ॥

बिल्वादिक्षीरम्

बिल्वशक्राम्बुमोचाब्दसिद्धमाजं पयः शिशोः ।
सामां सरक्तां ग्रहणीं पीतं हन्यात्त्रिरात्रतः ॥४४॥

बेलका गूदा, इन्द्रयव, सुगन्धवाला, मोचरस व नागरमोथासे सिद्ध बकरीके दूधको पीनेसे ३ रात्रिमें साम, सरक्त ग्रहणी दोष नष्ट होते हैं ॥ ४४ ॥

तद्वदजाक्षीरसमो जम्बूत्वगुद्भवो रसः ।

इसी प्रकार बकरीके दूधके साथ जामुनकी छालका रस लाभ करता है ॥

गुदपाकचिकित्सा

गुदपाके तु बालानां पित्तघ्नीं कारयेत्क्रियाम् ॥४५॥
रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥ ४६ ॥

बालकोंके गुदपाकमें पित्तनाशक क्रिया करनी चाहिये।विशेष कर पिलाने व लगानेसे लिये रसौंत हितकर है ॥४५॥४६॥

मूत्रग्रहतालुपातचिकित्सा

कणोषणसिताक्षौद्रसूक्ष्मैलासैन्धवैः कृतः ।
मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः ॥ ४७ ॥
घृतेन सिन्धुविश्वैलाहिङ्गुभार्ङ्गीरजो लिहन् ।
आनाहं वातिकं शूलं जयेत्तोयेन वा शिशुः ॥४८॥
हरीतकी वचा कुष्ठकल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्तन्येन मुच्यते तालुपातनात् ॥४९॥

बालकोंके मूत्रकी रुकावटमें छोटी पीपल, काली मिर्च, मिश्री, शहद, छोटी इलायची सेंधानमकके लेहको चटाना चाहिये । वातज आनाह तथा शूलमें सेंधानमक, सोंठ,इलायची भुनी हींग, भारंगीके चूर्णको घी अथवा जलके साथ चटाना चाहिये । तथा हर्र, बच और कूठके कल्कको शहद व दूधके साथ पिलानेसे तालुपातरोग नष्ट होता है ॥ ४७-४९ ॥

मुखपाकचिकित्सा

मुखपाके तु बालानां साअसारमयोरजः ।
गैरिकं क्षौद्रसंयुक्तं भेषजं सरसाञ्जनम् ॥ ५० ॥
अश्वत्थत्वग्दलक्षौद्रैर्मुखपाके प्रलेपनम् ।
दार्वीयष्टयभयाजातीपत्रक्षौद्रैस्तथापरम् ॥ ५१ ॥
सह जम्बीररसेन स्नुग्दलरसघर्षणं सद्यः ।
कृतमुपहन्ति हि पाकं मुखजं बालस्य चाश्वेव॥५२॥
लावतित्तिरिवल्लूरजः पुष्परसान्वितम् ।
द्रुतं करोति बालानां पद्मकेशरवन्मुखम् ॥ ५३ ॥

बालकोंके मुखपाकमें आमके अन्दरकी छाल, लोहभस्म गेरू और रसौंत शहद मिलाकर लगाना तथा चटाना भी चाहिये । तथा पीपलकी छाल और पत्तीके चूर्णका शहदके साथ लेप करना चाहिये । अथवा दारुहल्दी, मौरेठी, हर्र व जावित्रीके चूर्णका शहदके साथ लेप करना चाहिये । इसी प्रकार जम्बीरी निम्बूके रसके साथ सेहुंडके पत्तोंके रसका घिसना बालकोंके मुखपाकको नष्ट करता है । और लवा व तीतर इनके शुष्क मांसके चूर्णको शहदके साथ चटानेसे बालकोंके मुख कमलके समान होते हैं ॥ ५०-५३ ॥

दन्तोद्भवगदचिकित्सा

दन्तोद्भवोत्थरोगेषु न बालमतियन्त्रयेत् ।
स्वयमप्युपशाम्यन्ति जातदन्तस्य ते गदाः ॥५४॥

दन्त निकलते समय उत्पन्न रोगोंमें अधिक उपाय न करना चाहिये। दांत निकल जानेपर वे स्वयम् ही शान्त हो जाते हैं ॥ ५४ ॥

अरिष्टशान्तिः

सदन्तो यस्तु जायेत दन्ताः स्युर्यस्य चोत्तराः ।
कुर्यात्तस्य पिता शान्तिं बालस्यापि द्विजातये ।
दद्यात्सदक्षिणं बालं नैगमेषं प्रपूजयेत् ॥ ५५ ॥

१ वल्लूरं शुष्कमांसम् पुष्परसो मधु । इति वाग्भटः ।

जो बालक दांतसहित ही पैदा अथवा जिसके पहिले ऊपरके दांत निकले, उसका पिता शान्ति करे तथा बालकको दक्षिणाके सहित ब्राह्मणके लिये दान करे और नैगमेष ग्रहका पूजन करे ॥ ५५ ॥

हिक्काचिकित्सा

पञ्चमूलीकषायेण सघृतेन पयः शृतम् ।
सशृङ्गवेरं सगुडं शीतं हिक्कार्दितः पिबेत् ॥५६॥
सुवर्णगैरिकस्यापि चूर्णानि मधुना सह ।
लीढ्वा सुखमवाप्नोति क्षिप्रं हिक्कार्दितःशिशुः५७

हिक्कासे पीडित बालक घी सहित पञ्चमूलके काढ़ेसे सिद्ध कर ठण्ढा किया दूध गुड़ व सोंठके साथ पीवे। तथा सुनहले गेरूके चूर्णको भी शहदके साथ चाटनेसे शीघ्र ही बालककी हिक्का शान्त होती है ॥ ५६ ॥ ५७ ॥

चित्रकादिचूर्णम्

चित्रकं शृंगवेरं च तथा दन्ती गवाक्ष्यपि ।
चूर्णं कृत्वा तु सर्वेषां सुखोष्णेनाम्बुना पिबेत् ।
श्वासं कासमथो हिक्कां कुमाराणां प्रणाशयेत्५८॥

चीतकी जड़, सोंठ, दन्ती व इन्द्रायणका चूर्ण कर कुछ गरम जलके साथ पीनेसे बालकोंको श्वास, कास, तथा हिक्का शान्त होती है ॥ ५८ ॥

द्राक्षादिलेहः

द्राक्षायासाभयाकृष्णाचूर्णं सक्षौद्रसर्पिषा ।
लीढं श्वासं निहन्त्याशु कासं च तमकं तथा ॥ ५९

मुनक्का, जवासा, बड़ी हर्र व छोटी पीपलके चूर्णको शहद व घीके साथ चाटनेसे कास तथा तमक श्वास (दमा नामवाला रोग नष्ट होते हैं ॥ ५९ ॥

पुष्करादिचूर्णम्

पुष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
तच्चूर्णं मधुना लीढं शिशूनां पञ्चकासनुत्॥६०॥

पोहकरमूल, अतीस, काकडाशिंगी, छोटी पीपल व यवासाके चूर्णको शहदके साथ चाटनेसे समस्त कास नष्ट होते हैं ॥६०॥

तृष्णाचिकित्सा

दाडिमस्य च बीजानि जीरकं नागकेशरम् ।
चूर्णितं शर्कराक्षौद्रलीढं तृष्णाविनाशनम् ॥६१॥
मायूरपक्षभस्म व्युषितजलं तेम भावितं पेयम् ।
तृष्णाघ्नं वटकांकुरशीतजलं वक्त्रशोषजिद् धृतं वक्त्रे॥६२

अनारदाना, जीरा, व नागकेशरके चूर्णको शकर व शहद मिलाकर चाटनेसे प्यास नष्ट होती है तथा मयूरके पंखकी भस्मको बासी जलमें मिलाकर पीना चाहिये। अथवा बरगदकी वौंका हिम बनाकर मुखमें कवल धारण करना प्यासको शान्त करता है * ॥ ६१ ॥ ६२ ॥

नेत्रामयचिकित्सा

पिष्टैश्छागेन पयसा दार्वीमुस्तकगैरिकैः ।
बहिरालेपनं शस्तं शिशोर्नेत्रामयापहम् ॥६३॥
मनःशिला शंखनाभिः पिप्पल्योऽथ रसाञ्जनम् ।
वर्तिः क्षौद्रेण संयुक्ता बालस्याक्षिरुजाप्रणुत् ॥६४॥
मातृस्तन्यकटुस्नेहकाञ्जिकैर्भावितो जयेत् ॥
स्वेदाद्दीपशिखोत्तप्तो नेत्रामयमलक्तकः ॥ ६५ ॥
शुण्ठीभृंगनिशाकल्कः पुटपाकः ससैन्धवः ।
कुकूणकेऽक्षिरोगेषु भद्रमाश्च्योतनं हितम् ॥६६॥
क्रिमिघ्नालशिलादार्वीलाक्षाकाञ्चनगैरिकैः ।
चूर्णाञ्जनं कुकूणे स्यात्छिशूनां पोथकीषु च ॥६७॥
सुदर्शनामूलचूर्णाद् अञ्जनं स्यात्कुकूणके ॥ ६८ ॥

दारुहल्दी, नागरमोथा और गेरूको बकरीके दूधमें पीसकर आंखोंके बाहर लेप करनेसे बालकके नेत्ररोग शान्त होते हैं। तथा मनशिल, शंखनाभि, छोटी पीपल, व रसौतको पीसकर बनायी गयी बत्तीको शहदमें मिलाकर लगानेसे समग्र नेत्ररोग नष्ट होते हैं। तथा माताके दूध, कड़आ तैल और काजीसे भावित वस्त्रको दीपशिखामें गरम कर सेकनेसे नेत्ररोग नष्ट होते हैं। इसीप्रकार सोंठ, भांगरा, हल्दी और सेंधानमकका पुटपाक कर आश्च्योतन करना कुकूणक (कुथुई) तथा अन्य नेत्ररोगोंमें लाभ करता है। तथा वायविडंग, हरिताल मनशिल, दारुहल्दी लाख, सुनहले गेरूके चूर्णका अञ्जन बालकोंके कुकूणक तथा पोथकी रोगमें लगाना चाहिये। कुकूणकमें सुदर्शनकी जड़के चूर्णका भी अञ्जन किया जाता है ॥ ६३-६८ ॥

सिध्मपामादिचिकित्सा

गृहधूमनिशाकुष्ठवाजिगन्धेन्द्रयवैः शिशोः ।
लेपस्तक्रेण हन्त्याशु सिध्मपामाविचर्चिकाः ॥६९॥

घरका धुआँ, हल्दी, कूठ, असगन्ध और इन्द्रयवको मट्ठेके साथ पीसकर किये गये लेपसे सिध्म, पामा और विचर्चिकारोग नष्ट होते हैं ॥ ६९ ॥

अश्वगन्धाघृतम्

पादकल्केऽश्वगन्धायाः क्षीरे दशगुणे पचेत् ।
घृतं पेयं कुमाराणां पुष्टिकृद्बलवर्धनम् ॥ ७० ॥

असगन्धके चतुर्थांश कल्क और दशगुण दूधमें सिद्ध घृत बालकोंको पुष्ट तथा बलवान् करता है ॥ ७० ॥

---

* कुछ पुस्तकोंमें यहांसे ७२ श्लोकतकका पाठ नहीं हैं ॥

चाङ्गेरीघृतम्

चाङ्गेरीस्वरसे सर्पिश्छागक्षीरसमे पचेत् ।
कपित्थव्योषसिन्धूत्थसमङ्गोत्पलबालकैः ॥७१॥
सबिल्वधातकीमोचैः सिद्धं सर्वातिसारनुत् ।
ग्रहणीं दुस्तरां हन्ति बालानां तु विशेषतः ॥७२॥

चांगेरीके स्वरस ३ भाग, घी १ भाग, दूध १ भाग तथा कैथा, त्रिकटु, सेंधानमक, लज्जालु, नीलोफर, सुगन्धवाला, बेल धायके फूल, व मोचरसके कल्कसे सिद्ध घृत बालकोंके समस्त अतीसारों तथा दुष्ट ग्रहणीको नष्ट करता है ॥ ७१ ॥ ७२ ॥

कुमारकल्याणकं घृतम्

शंखपुष्पी वचा ब्राह्मी कुष्ठं त्रिफलया सह ।
द्राक्षा सशर्करा शुण्ठी जीवन्ती जीरकं बला ॥७३॥
शठीं दुरालभा बिल्वं दाडिमं सुरसास्थिरा ।
मुस्तं पुष्करमूलं च सूक्ष्मैला गजपिप्पली ॥७४॥
एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत् ।
कषाये कण्टकार्याश्च क्षीरे तस्मिंश्चतुर्गुणे ॥७५॥
एतत्कुमारकल्याणघृतरत्नं सुखप्रदम् ।
बलवर्णकरं धन्यं पुष्ट्यग्निबलवर्धनम् ।
छायासर्वग्रहालक्ष्मीक्रिमिदन्तगदापहम् ।
सर्वबालामयहरं दन्तोद्भेदं विशेषतः ॥ ७७ ॥

शंखपुष्पी, बच, ब्राह्मी, कूठ, त्रिफला, मुनक्का, शक्कर, सोंठ, जीवन्ती, जीरा, खरेटी, कचूर, यवासा, बेल, अनार, तुलसी, शालपर्णी, नागर मोथा, पोहकरमूल, छोटी, इलायची, व गजपीपल, प्रत्येक १ तोलेका कल्क, छोटी कटेरीका क्वाथ ६ सेर ३२ तोला, दूध ६ सेर ३२ तो० मिलाकर १२८ तोला, घी पकाना चाहिये । यह "कुमारकल्याण" नामक घृत बल व वर्णको बढाता पुष्टि तथा अग्निको बढाता, ग्रहदोष छाया, क्रिमिदन्त तथा दांत उत्पन्न होनेसे समय उत्पन्न होनेवाले रोगोंके विशेषतः नष्ट करता है ॥ ७३–७७ ॥

अष्टमङ्गलं घृतम्

वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ।
शारिवा सैन्धवं चैव पिप्पलीघृतमष्टमम् ॥७८॥
मेध्यं घृतमिदं सिद्धं पातव्यं च दिने दिने ।
दृढस्मृतिः क्षिप्रमेधाः कुमारो बुद्धिमान्भवेत् ॥७९॥
न पिशाचा न रक्षांसि न भूता न च मातरः ।
प्रभवन्ति कुमाराणां पिबतामष्टमङ्गलम् ॥ ८० ॥

बच, कूठ, ब्राह्मी, सरसों, शारिवा, सेंधानमक व छोटी पीपलके कल्कमें घृत और जल मिलाकर पकाना चाहिये । घृत सिद्ध हो जानेपर बालकको प्रतिदिन पिलाना चाहिये । यह मेधाको बढाता है । इसके सेवनसे बालक स्मृतिमान्, बुद्धिमान् व मेधावी होता है । इसे पीनेवाले बालकोंपर पिशाच, राक्षस, भूत और माता आदि किसीका प्रभाव नहीं पड़ता । इसे "अष्टमङ्गल" कहते हैं ॥ ७८–८० ॥

लाक्षादितैलम्

लाक्षारससमं सिद्धं तैलं मस्तु चतुर्गुणम् ।
रास्नाचन्दनकुष्ठाब्दवाजिगन्धानिशायुगैः ॥ ८१ ॥
शताह्वादारुयष्ट्याह्वमूर्वातिक्ताहरेणुभिः ।
बालानां ज्वररक्षोघ्नमभ्यङ्गाद्बलवर्णकृत् ॥ ८२ ॥

लाखके रसके समान, चतुर्गुण दहीके तोड़ और रासन, चन्दन कूठ, नागरमोथा, असगन्ध, हल्दी, दारुहल्दी, सौंफ, देवदारु, मौरेठी, मूर्वा, कुटकी व सम्भालूके बीजके कल्कसे सिद्ध तैलकी मालिश करनेसे बालकोंके ज्वर तथा राक्षसदोष नष्ट होते हैं ॥ ८१–८२ ॥

ग्रहचिकित्सा

सहामुण्डितिकोदीच्यक्वाथस्नानं ग्रहापहम् ।
सप्तच्छदनिशाकुष्ठचन्दनैश्चानुलेपनम् ॥ ८३ ॥
सर्पत्वग्लशुनं मूर्वासर्षपारिष्टपल्लवाः ।
वैडालविड्जालोममेषशृङ्गीवचामधु ॥ ८४ ॥
धूपः शिशोर्ज्वरघ्नोऽयमशेषग्रहनाशनः ।
बलिशान्तीष्टकर्माणि कार्याणि ग्रहशान्तये ॥८५॥
मन्त्रश्चायं प्रयोक्तव्यस्तत्रादौ सार्वकामिकः ॥८६॥

मुद्गपर्णी, मुण्डी, व सुगन्धवालाके क्वाथसे स्नान ग्रहदोषको नष्ट करता है तथा सप्तपर्ण, हल्दी, कूठ, व चन्दनका अनुलेप भी ग्रहदोषको नष्ट करता है। और सांपकी कॅचुल ,लहसुन मूर्वा, सरसों, नीमकी पत्ती, बिडालकी विष्ठा, बकरीके रोवां, मेढाशिङ्गी, बच व शहदकी धूप बालकके ज्वर तथा समग्र ग्रहदोषोंको नष्ट करती है । तथा बलि, शान्ति व इष्टकर्म आदि ग्रहशान्तिके लिये करना चाहिये । और धूप देनेके लिये यह आगे लिखा सार्वकामिक मन्त्र पढना चाहिये ॥ ८३–८६ ॥

सार्वकामिको मन्त्रः

ॐ नमो भगवते गरुडाय त्र्यम्बकाय सद्यस्तवस्तुतः स्वाहा । ॐ कं पं टं शं वैनतेयाय नमः ॐ ह्रीं हूं क्षः ॥ इति मन्त्रः ।

बालदेहप्रमाणेन पुष्पमालां तु सर्वतः ।
प्रगृह्य मुच्छिकाभक्तबलिर्देयस्तु शान्तिकः ।

बालककी देहके बराबर फूलोंकी माला लेकर भातसे भरे शिकोरेके चारों ओर लपेटकर बलि देना चाहिये । और बलि देते समय नीचे लिखा मन्त्र पढना चाहिये

बलिमन्त्रः

ओङ्कारी स्वर्णपक्षी बालकं रक्ष रक्ष स्वाहा । गरुड बलिः । ॐ नमो नारायणाय नमः इति मन्त्रः ॥८७॥

नन्दनामातृकाचिकित्सा

प्रथमे दिवसे मासे वर्षे वा गृह्णाति नन्दना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । अशुभं शब्दं मुञ्चति, चीत्कारं च करोति, स्तन्यं न गृह्णाति । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा शुक्लौदनं, शुक्लपुष्पं, शुक्लसप्त ध्वजाः, सप्त प्रदीपाः, सप्त स्वस्तिकाः. सप्त वटकाः, सप्त शष्कुलिकाः, जम्बुलिकाः, सप्त मुष्टिकाः, गन्धं, पुष्पं, ताम्बूलं, मत्स्यं, मांसं, सुरा, अग्रभक्तं च पूर्वस्यां दिशि चतुष्पथे मध्याह्ने बलिर्देयः । ततोऽश्वत्थपत्रं कुम्भे प्रक्षिप्य शान्त्युदकेन स्नापयेत् । रसोनसिद्धार्थकमेषशृङ्गनिम्बपत्रशिवनिर्माल्यैर्बालकं धूपयेत् । "ॐ नमो नारायणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा" एवं दिनत्रयं बलिं दत्त्वा चतुर्थे दिवसे ब्राह्मणं भोजयेत् । ततः सम्पद्यते शुभम् ॥ ८८ ॥

पहिले दिन, पहिले महीने अथवा पहिले वर्षमें नन्दनानाम मातृका ग्रहण करती है । उसके ग्रहण करते ही पहिले ज्वर आता है । अशुभ शब्द करता तथा चिचिहाता है, दूध नहीं पीता । उसके लिये बलि बतलाते हैं, जिससे बालक सुखी होता है । नदीके दोनों किनारोंकी मिट्टी लेकर सफेद भात, फूल, सफेद सात झंडियाँ,सात दीपक, सात स्वस्तिक(सन्थिया) ७ बड़े, ७ पूड़ियाँ, ७ जलेबियाँ ७ मुट्ठी सुगन्धित पुष्प, मछलियाँ, पान, मांस, शराबकी बलि, अग्रभक्त (उत्तम हांड़ीमें भरे भात) के साथ मध्याह्नमें पूर्व दिशाके चौराहेपर देना चाहिये । फिर पीपलका पत्र जलमें छोड़कर शान्तिकारक जलसे स्नान कराना चाहिये । तथा लहसुन, सरसों, मेढाका सींग, नीमकी पत्ती और शिवनिर्माल्यकी धूप देनी चाहिये और यह मन्त्र पढ़ना चाहिये । "ओं नमो नारायणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा" इस प्रकार तीन दिन बलि देकर चौथे दिन ब्राह्मणभोजन कराना चाहिये। इस प्रकार बालक आरोग्य होता है ॥ ८८ ॥

सुनन्दालक्षणं चिकित्सा च ।

द्वितीये दिवसे मासे वर्षे वा गृह्णाति सुनन्दा नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । चक्षु रुन्मीलयति गात्रमुद्वेजयति, न शेते क्रन्दति स्तन्यं न गृह्णाति, चीत्कारश्च भवति । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । तण्डुलं हस्तपृष्ठैकं दधि गुडघृतं च मिश्रितं, शरावैकं, गन्धताम्बूलं, पीतपुष्पं पीतसप्तध्वजा, सप्त प्रदीपाः दश स्वस्तिकाः, मत्स्यमांससुरातिलचूर्णानि । पश्चिमायां दिशि चतुष्पथे बलिर्देयः दिनानि त्रीणि सन्ध्यायाम् । ततः शान्त्युदकेन स्नापयेत् । शिवनिर्माल्यसिद्धार्थमार्जारलोमोशीरवालघृतैर्धूपं दद्यात् । "ॐ नमो नारायणाय अमुकस्य व्याधिं हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा" । चतुर्थे दिवसे ब्राह्मणं भोजयेत् । ततः सम्पद्यते शुभम् ॥ ८९ ॥

दूसरे दिन, मास और वर्षमें सुनन्दानाम मातृका ग्रहण करती है । उसके ग्रहण करते ही पहिले ज्वर होता है, बालक आंखें फैलाता है, शरीर कम्पाता है, सोता नहीं, रोता है, दूध नहीं पीता, चीत्कार करता है । उसके लिये नीचे लिखी विधिसे बलि देना चाहिये । एक पसर भात, दही, गुड़, घी मिलाकर एक शराव, गन्ध, पान, पीले फूल, पीली ७ झंडियां, सात दीपक, दश स्वस्तिक, मछलियां, मांस, शराब तिलचूर्ण पश्चिमदिशाको चौराहेमें सायंकाल बलि देना चाहिये। इस प्रकार ३ दिन करना चाहिये । फिर शान्तिजलसे स्नान कराना चाहिये । तथा शिवनिर्माल्य, सरसों, बिल्लीके रोवां, खश, सुगन्धवाला और घीकी धूप देना चाहिये । और यह मन्त्र पढना चाहिये । "ओं नमो नारायणाय अमुकस्य, व्याधि हन हन मुञ्च मुञ्च ह्रीं फट् स्वाहा" चौथे दिन ब्राह्मण भोजन कराना चाहिये । इस प्रकार बालक सुखी होता है ॥ ८९ ॥

पूतनाचिकित्सा

तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति, स्तन्यं न गृह्णाति, मुष्टिं बध्नाति, क्रन्दति, ऊर्ध्वं निरीक्षते । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा गन्धपुष्पताम्बूलरक्तचन्दनं, रक्तपुष्पं,रक्तसप्त ध्वजाः सप्त प्रदीपाः, सप्तस्वस्तिकाः, पक्षिमांसं, सुरा, अग्रभक्तं च, दक्षिणस्यां दिशि अपराह्णे चतुष्पथे बलिर्दातव्यः शिवनिर्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत् । "ॐ नमो नारायणाय बालस्य व्याधिं हन हन मुञ्च मुञ्च ह्रासय ह्रासय स्वाहा" चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः सम्पद्यते शुभम् ९०

तीसरे दिन महीने और वर्षमें पूतनानाम मातृका ग्रहण करती है । उसके ग्रहण करते ही पहिले ज्वर

आता है, बालकका शरीर कम्पाता है, दूध नहीं पीता मुट्ठी बांधता, रोता तथा ऊपरको देखता है। उसके लिये बलि देनेकी यह विधि है कि नदीके दोनों किनारोंकी मिट्टीको लेकर पुतला बना गन्ध, फूल, पान, लाल चन्दन, लाल फूल लाल ७ पताका, ७ दीपक ७ स्वस्तिक, पक्षियोंका मांस, शराब व उत्तम भातकी दक्षिणदिशाके चौराहेमें अपराह्नमें बलि देनी चाहिये। और शिवनिर्माल्य, गुग्गुलु, सरसो, नीमकी पत्ती व मेढाके सींगसे धूप करनी चाहिये। तथा यह मन्त्र पढना चाहिये। "ॐ नमो नारायणाय बालकस्य व्याधि हन हन मुञ्च मुञ्च ह्रासय ह्रासय स्वाहा"। चौथे दिन ब्राह्मण भोजन करावे। इस प्रकार सुख होता है॥ ९०॥

मुखमण्डिकाचिकित्सा

चतुर्थे दिवसे मासे वर्षे वा गृह्णाति मुखमण्डिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। ग्रीवां नामयति, अक्षिणी उन्मीलयति, स्तन्यं न गृह्णाति, रोदिति, स्वपिति, मुष्टिं बध्नाति। बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा उत्पलपुष्पं, गन्धताम्बूल, दश ध्वजाः, चत्वारः प्रदीपाः, त्रयोदश स्वस्तिकाः, मत्स्यमांससुरा, अन्नभक्तं च उत्तरस्यां दिशि अपराह्णे चतुष्पथे बलिं दद्यात्। आद्यः मासिको धूपः "ॐ नमो नारायणाय हन हन मुञ्च मुञ्च स्वाहा" चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः सम्पद्यते शुभम्॥ ९१॥

चौथे दिन चौथे महीने अथवा चौथे वर्षमें मुखमण्डिका नाम मातृका ग्रहण करती है, उसके ग्रहण करते ही पहिले ज्वर होता है, गर्दन चलाता है, आंखें निकालता है, दूध नहीं पीता, रोता, सोता तथा मुट्ठी बांधता है। उसके लिये बलि इस प्रकार देना चाहिये।नदीके दोनों किनारोंकी मिट्टीसे पुतला बना नीलकमलके फूल, गन्ध, ताम्बूल, दश पताकाएँ, ४ दीपक, १३ स्वस्तिक, मछली, मांस, शराब, भात उत्तर दिशामें सायंकाल चौराहेपर बलि देनी चाहिये। तथा प्रथम मांसमें कही हुई धूप देनी चहिये। "ॐनमो नारायणाय हन हन मुञ्च मुञ्च स्वाहा"।चौथे दिन ब्राह्मणोंको भोजन कराना चाहिये। तब सुखी होता है॥ ९१॥

कठपूतनामातृकाचिकित्सा

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति कठपूतना नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति, स्तन्यं न गृह्णाति, मुष्टिं च बध्नाति बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। कुम्भकारचक्रस्य मृत्तिकां गृहीत्वा पुत्तलिकां निर्माय गन्धताम्बूलं, शुक्लौदनं, शुक्लपुष्पं, पञ्च ध्वजाः, पञ्च प्रदीपाः, पञ्च वटकाः, ऐशान्यां दिशि बलिर्दातव्यः। शान्त्युदकेन स्नापयेच्छिवनिर्माल्यसर्पनिर्मोकगुग्गुलुनिम्बपत्रबालकघृतैर्धूपं दद्यात् "ॐ नमो नारायणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा" चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः सम्पद्यते शुभम्॥ ९२

पांचवें, दिन, महीने और वर्षमें कठपूतनानाम मातृका ग्रहण करती है। उसके ग्रहण करते ही ज्वर आता है, शरीर कम्पता है, दूध नहीं पीता, मुट्ठी बांधता है,। उसके लिये इस प्रकार बलि देना चाहिये। कुम्हारके चाककी मिट्टी ले पुतला बना गन्ध, ताम्बूल, सफेद भात, सफेद फूल, ५ पताकाएँ ५ दीपक, ५ बड़े इनकी ऐशान्य दिशामें बलि देनी चाहिये।शान्तिजलसे स्नान कराना चाहिये और शिवनिर्माल्य, सांपकी केंचुल, गुग्गुलु, नीमकी पत्ती, सुगन्धवाला और घीसे धूप देनी चाहिये। और "ॐ नमो नारायणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा" यह मन्त्र पढ़ना चाहिये। चौथे दिन ब्राह्मण भोजन कराना चाहिये। इस प्रकार शुभ होता है॥ ९२॥

शकुनिकाचिकित्सा

षष्ठे दिवसे मासे वर्षे वा गृह्णाति शकुनिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रभेदं च दर्शयति, दिवारात्रावुत्थानं भवति, ऊर्ध्वं निरीक्षते। बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा शुक्लपुष्पं, रक्तपुष्पं, पीतपुष्पं पीतपुष्पं गन्धताम्बूलं, दशप्रदीपाः, दशध्वजाः, दश स्वस्तिका, दश मुष्टिकाः, दश वटकाः, क्षीरजम्बूडिका, मत्स्यमांससुरा आग्नेय्यां दिशि निष्क्रांते मध्याह्ने बलिं दापयेत्। शान्त्युदकेन स्नापयेत्। शिवनिर्माल्यरसोनगुग्गुलुसर्पनिर्मोकनिम्बपत्रघृतैः धूपं दद्यात्। "ॐ नमो नारायणाय चूर्णय चूर्णय हन हन स्वाहा" चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः सम्पद्यते॥ ९३॥

छठे दिन, महीने और वर्षमें शकुनिका ग्रहण करती है। उसके ग्रहण करते ही पहिले ज्वर आता है, शरीर टूटता है, दिनरात चौंकता है, ऊपर देखता है। उसके लिये इस प्रकार बलि देना चाहिये। पिट्ठीका पुतला बना सफेद फूल, लाल फूल, पीले फूल, गन्ध, ताम्बूल, दशदीप, दशपताकाएँ, दशस्वास्तिक, दश लड्डू, दश बड़े, दूधकी जलेबी, मछली,मांस व शराबकी आग्नेय दिशामें मध्यान्ह बीत जानेपर बलि देनी चाहिये तथा शान्तिजलसे स्नान करना चाहिये और शिवनिर्माल्य, लहसुन, गुग्गुलु, सांपकी केंचुल, नीमकी पत्तीकी धूप देनी

चाहिये । और " ॐ नमो नारायणाय चूर्णय चूर्णय हन हन स्वाहा " इस मन्त्रका जप करना चाहिये । और चौथे दिन ब्राह्मण भोजन करना चाहिये । तब शांति होती है ॥ ९३ ॥

शुष्करेवतीचिकित्सा।

सप्तमे दिवसे मासे वर्षे वा यदा गृह्णाति शुष्करेवती नाम मातृका । तथा गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति, मुष्टिं बध्नाति, रोदिति । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । रक्तपुष्पं, शुक्लपुष्पं, गन्धताम्बूलं, रक्तौदनं कृसरा, त्रयोदश स्वस्तिकाः, मत्स्यमांससुरात्रयोदश ध्वजाः, पञ्च प्रदीपाः, पश्चिमदिग्भागे ग्रामनिष्कासे अपराह्णे वृक्षमाश्रित्यबलिं दद्यात् । शान्त्युदकेन स्नानं गुग्गुलुमेषशृङ्गीसर्षपोशीरवालकघृतैर्धूपयेत् । " ॐ नमो नारायणाय दीप्ततेजसे हन हन मुञ्च मुञ्च स्वाहा ' चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततःसम्पद्यते शुभम् ॥ ९४ ॥

सातवें दिन, महीने या वर्षमें शुष्करेवती नामक मातृका ग्रहण करती है । उसके ग्रहण करते ही पहिले ज्वर होता है, शरीर कम्पाता है, मुट्ठी बांधता है, रोता है । उसके लिये बलि कहते हैं । लाल फूल, सफेद फूल, गन्ध, ताम्बूल, लाल भात, खिचडी, १३ स्वास्तिक, मछली, मांस, शराब, तेरह पताका, और ५ दीपक सायंकाल ग्रामके निकासपर पश्चिम दिशामें वृक्षके नीचे बलि देवे। तथा शांतिजलसे बालकको स्नान करावे । और गुग्गुलु मेढाशिंगी, सरसों, खश, सुगन्धवाला व घीकी धूप देनी चाहिये । ॐ नमो नारायणाय दीप्ततेजसे हन हन मुञ्च मुञ्च स्वाहा " । यह मन्त्र पढना चाहिये । चौथे दिन ब्राह्मणभोजन कराना चाहिये । तब सुखी होता है॥९४॥

अर्यकाचिकित्सा

अष्टमे दिवसे मासे वर्षे वा यदि गृह्णाति अर्यका नाम मातृका । तथा गृहीतमात्रेण प्रथमं भवति ज्वरः. गृध्रगन्धः पूतिगन्धश्च जायते, आहारं च न गृह्णाति, उद्वेज यति गात्राणि । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । रक्तपीतध्वजाः, चन्दनं, पुष्पं, शष्कुल्यः, पर्पटिका, मत्स्यमांससुराजम्बुलिकाः प्रत्यूषे बलिर्देयः प्रान्तरे । मन्त्रः " ॐ नमो नारायणाय चतुर्दिङ्मोक्षणाय व्याधिं हन हन मुञ्च मुञ्च ॐ ह्रीं फट् स्वाहा " चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः सम्पद्यते शुभम् ॥ ९५ ॥

आठवें दिन, महीने और वर्षमें जो ग्रहण करती है, उसे अर्यका नाम मातृका कहते हैं । उसके ग्रहण करते ही पहिले ज्वर आता है, गृधके समान दुर्गन्ध आती है, आहार नहीं करता, शरीर कम्पाता है । उसके लिये बलि कहते हैं- जिससे सुख होता है। लाल पीली पताकाएं, चन्दन, फूल, पूडी, पापड मछलियां मांस, शराब, जलेबियां इनकी सबेरे एककिनारे बलि देना चाहिये और यह मन्त्र पढना चाहिये । "ॐ नमो नारायणाय चतुर्दिङ्मोक्षणाय व्याधिं हन हन मुञ्च मुञ्च ॐ ह्रीं फट् स्वाहा " । चौथे दिन ब्राह्मण भोजन करावे । तब शुभ होता है ॥ ९५ ॥

भूसूतिकाचिकित्सा

नवमे दिवसे मासे वर्षे वा गृह्णाति भूसूतिका नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । नित्यं छर्दिर्भवति गात्रभेदं दर्शयति. मुष्टिं बध्नाति । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा पुत्तलिकां निर्माय शुक्लवस्त्रेण वेष्टयेच्छुक्लपुष्पं, गन्धताम्बूलं, शुक्लत्रयोदश ध्वजाः, त्रयोदश दीपाः त्रयोदश स्वस्तिकाः, त्रयोदश पुत्तलिकाः, त्रयोदशमत्स्य पुत्तलिकाः, मत्स्यमांससुराः, उत्तरदिग्भागे ग्रामनिष्कासे बलिं दद्यात् । शान्त्युदकेन स्नानं, गुग्गुलुनिम्बपत्रगोशृङ्गश्वेतसर्षपघृतैर्धूपं दद्यात् । मन्त्रः " ॐ नमो नारायणाय चतुर्भुजाय हन हन मुञ्च मुञ्च स्वाहा " चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः सम्पद्यते शुभम् ॥ ९६ ॥

नवें दिन, महीने और वर्षमें भूसूतिकानाम मातृका ग्रहण करती है । उसके ग्रहण करते ही पहिले ज्वर आता है, नित्य वमन होती हैं, शरीरमें पीडा होती, मुट्ठी बांधता है । उसके लिये बलि कहते हैं जिससे सुख होता है । नदीके दोनों किनारोंकी मिट्टी ले पुतला बना सफेद कपडेसे लपेटना चाहिये।तथा सफेद फूल, गन्ध, ताम्बूल, सफेद १३ झण्डियां, १३ दीपक १३ वास्ति, १३ पुत्तलिका, १३ मछलीकी पुत्तलियां, मछलियां मांस व शराबकी उत्तर दिशामें ग्रामके निकासपर बलि देनी चाहिये । शान्तिजलसे स्नान करना चाहिये। और गुग्गुलु नीमकी पत्ती, गायका सींग, सफेद सरसों और घीकी धूप देनी चाहिये (" ॐ नमो नारायणाय चतुर्भुजाय हन हन मुञ्च मुञ्च स्वाहा " यह मन्त्र पढना चाहिये । चौथे दिन ब्राह्मण भोजन करावे । तब सुख होता है ॥ ९६ ॥

निर्ऋताचिकित्सा

दशमे दिवसे मासे वर्षे वा गृह्णाति निर्ऋता नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः । गात्रमुद्वेजयति, चीत्कारं करोति, रोदिति, मूत्रं पुरीषं च भवति । बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । पारावारमृत्तिकां गृहीत्वा पुत्तलिकां निर्माय गन्ध-

ताम्बूलं, रक्तपुष्पं, रक्तचन्दनं, पञ्च वर्णध्वजाः, पञ्च प्रदीपाः, पंचस्वस्तिकाः, पञ्च पुत्तलिकाः, मत्स्यमांससुराः, वायव्यां दिशि बलिं दद्यात् । काकविष्ठागोमांसगोश्रृङ्गरसोनमार्जारलोमनिम्बपत्रघृतैर्धूपयेत् । "ॐ नमो नारायणाय चूर्णितहस्ताय मुञ्च मुञ्च स्वाहा" चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः स्वस्थो भवति बालकः ॥ ९७ ॥

दशवें दिन, महीने या वर्षमें निर्ऋतिका मातृका ग्रहणकरती है। उसके ग्रहण करते ही पहिले ज्वर आता है, शरीर कम्पता है, चीत्कार करता है, रोते रोते दस्त व पेशाब हो जाता है। उसके लिये बलि कहते हैं। नदीके दोनों ओरकी मिट्टी ले पुतला बना गन्ध, ताम्बूल, लाल फूल, लाल चन्दन, पाँच रङ्गकी पताकाएँ, पाँच दीपक, ५ स्वास्तिक, ५ पुत्तलियाँ, मछलियाँ, मांस व शराबकी वायव्य दिशामें बलि देनी चाहिये और लशुन, बिल्लीके रोवें, काकविष्ठा, गोमांस, गोश्रृंग, नीमकी पत्ती और घीसे धूप देनी चाहिये। "ॐ नमो नारायणाय चूर्णितहस्ताय मुञ्च मुञ्च स्वाहा" यह मन्त्र पढना चाहिये। चौथे दिन ब्राह्मणभोजन कराना चाहिये। तब बालक स्वस्थ होता है ॥ ९७ ॥

पिलिपिच्छिलिकाचिकित्सा

एकादशे दिवसे मासे वर्षे वा यदि गृह्णाति पिलिपिच्छिलिका नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः। आहारं न गृह्णाति, ऊर्ध्वदृष्टिर्भवति गात्रभङ्गो भवति। बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा रक्तचन्दनं रक्तं पुष्पं च तस्या मुखं दुग्धेन सिञ्चेत्। पीतपुष्पं, गन्धताम्बूलं, सप्त पीतध्वजाः, सप्त प्रदीपाः, अष्टौ वटकाः, अष्टौ शष्कुलिकाः, अष्टौ पूरिकाः, मत्स्यमांससुराः पूर्वस्यां दिशि बलिर्दातव्यः। शान्त्युदकेन स्नानं शिवनिर्माल्यगुग्गुलुगोश्रृङ्गसर्पनिर्मोकघृतैर्धूपयेत्। "ॐ नमो नारायणाय मुञ्च मुञ्च स्वाहा" चतुर्थदिवसे ब्राह्मणं भोजयेत्ततः सुस्थो भवति बालकः ॥ ९८ ॥

ग्यारहवें दिन महीने वर्षमें पिलिपिच्छिलिका मातृका ग्रहण करती है। उसके ग्रहण करते ही पहिले ज्वर आता है, आहार नहीं करता, आंखें निकालता है, शरीर टूटता है उसके लिये बलि कहते हैं। पिट्ठीकी पुत्तलिका बनाकर उसका मुख लाल चन्दनसे रंगकर उसमें दूध छोड़ना चाहिये। तथा पीले फूल गन्ध, तांबूल, सात पीली पताकाएँ, सात दीपक, आठ बड़े आठ पूडियां आठ जलेबियां, मछली, मांस, व शराबकी पूर्वदिशामें बलि देनी चाहिये। शांतिजलसे स्नान कराना चाहिये तथा शिवनिर्माल्य, गुलगुल, गोश्रृंग, सांपकी केंचुर और घीसे धूप करना चाहिये। "ॐ नमो नारायणाय मुञ्च मुञ्च स्वाहा" यह मन्त्र पढना चाहिये। तब बालक सुस्थ होता है ॥९८॥

कालिकाचिकित्सा

द्वादशे दिवसे वर्षे वा यदि गृह्णाति कालिका नाम मातृका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। विहस्य वादयति, करेण तर्जयति, गृह्णाति, क्रामति, निःश्वसिति, मुहुर्मुहुश्छर्दयति, आहारं न करोति। बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। क्षीरेण पुत्तलिकां कृत्वा गन्धं, ताम्बूलं, शुक्लपुष्पं, शुक्लसप्तध्वजाः, सप्त प्रदीपाः, सप्त पूपिकाः, करस्थेन दधिभक्तेन सर्वकर्मबलिं दद्याच्छांत्युदकेन स्नापयेत्। शिवनिर्माल्यगुग्गुलुसर्षपघृतैर्धूपयेत्। "ॐ नमो नारायणाय मुञ्च मुञ्च हन हन स्वाहा" चतुर्थे दिवसे ब्राह्मणं भोजयेत्ततः सुस्थो भवति बालकः९९॥

बारहवें दिन, महीने या वर्षमें कालिका मातृका ग्रहण करती है। उसके ग्रहण करते ही ज्वर आता है। हँसकर तालियां बजाता है, उठता है, आहार नहीं करता। उसके लिये बलि कहते हैं। दूधके साथ पुतला बनाकर गन्ध, ताम्बूल, सफेद फूल, सफेद सात पताका, सात दीपक, पुवा, तथा हाथमें दही भात लेकर समस्त बलिकर्म करना चाहिये। शांतिजलसे स्नान कराना चाहिये तथा शिवनिर्माल्य, गुलगुल, सरसों और घीसे धूप देनी चाहिये। "ओं नमोनारायणाय मुञ्च मुञ्च हन हन स्वाहा" यह मन्त्र पढना चाहिये। चौथे दिन ब्राह्मणभोजन कराना चाहिये। तब बालक स्वस्थ होता है ॥ ९९ ॥

इति बालरोगाधिकारः समाप्तः।

अथ विषाधिकारः

सामान्यचिकित्सा

अरिष्टाबन्धनं मन्त्रः प्रयोगाश्च विषापहाः।
दंशनं दंशकस्याहेः फलस्य मृदुनोऽपि वा ॥ १ ॥

१ पूर्वोक्त समस्त मन्त्रोंमें नारायणके स्थानमें "रावणाय" अनेक प्रतियोंमें मिलता है। पर वह उत्तम नहीं प्रतीत होता क्योंकि एक तो रावणको प्रणाम करनेकी लौकिक प्रथा नहीं, दूसरे एक मन्त्रमें "चतुर्भुजाय" विशेषण भी आया है जो कि विष्णुभगवानके लिये ही आता है। अतः "नारायणाय" यही ठीक है। पर नारायणके लिये दूसरोंके मांस तथा शराब आदिकी बलि देना उचित नहीं प्रतीत होता, अतः द्विजातियोंको ऐसे पदार्थ पृथक् कर ही करना चाहिये ॥

दशसे चार अंगुल ऊपर वस्त्र या रस्सी आदिसे बांधना (तथा मन्त्रद्वारा बान्ध देना) मन्त्र, विषनाशक प्रयोग तथा काटनेवाले सर्पको ही पकड़कर काट देना और यदि सर्प न मिले, तो मुलायम फलोंको दांतोंसे काटकर फेंकनेसे सर्वविष शान्त होता है ॥ १ ॥

प्रत्यङ्गिरामूलयोगाः

मूलं तण्डुलवारिणा पिबति यः प्रत्यङ्गिरासम्भवं
निष्पिष्टं शुचि भद्रयोगदिवसे तस्याहिभीतिः कुतः ।
दर्पादेव फणी यदा दशति तं मोहान्वितो मूलपं
स्थाने तत्र स एव याति नियतं वक्त्रं यमस्याचिरात् ॥ २

जो मनुष्य कण्टकिशिरीषकी जड़के चूर्णको चावलके जलके साथ आषाढ़ मासमें उत्तम नक्षत्रादियुक्त दिनमें पीता है, उसको सर्पका कोई भय नहीं रहता । यदि कोई सांप दर्पसे उसे काटही ले, तो तुरन्त उसी स्थानमें वह सर्प ही मर जाता है २ ॥

निम्बपत्रयोगः

मसूरं निम्बपत्राभ्यां खादेन्मेषगते रवौ ।
अब्दमेकं न भीतिः स्याद्विषात्तस्य न संशयः ॥३॥

जो मनुष्य मेषके सूर्यमें मसूरकी दालको नीमकी पत्तीके शाकके साथ खाता है, उसे एक वर्षतक विषसे कोई भय नहीं होता ॥ ३ ॥

पुनर्नवायोगः

धवलपुनर्नवजटया तण्डुलजलपीतया च पुष्यर्क्षे ।
अपहरति विषधरविषोपद्रवमावत्सरं पुंसाम् ॥४॥

सफेद पुनर्नवाकी जड़को पुष्यनक्षत्रमें चावलके जलके साथ पीस मिलाकर पीनेसे एक वर्षतकके लिये सर्पके विषके भयको दूर रखता है ॥ ४ ॥

सर्पदष्टचिकित्सा

गृहधूमो हरिद्रे द्वे समूलं तण्डुलीयकम् ।
अपि वासुकिना दष्टः पिबेद्दधिघृताप्लुतम् ।
कूलिकामूलनस्येन कालदष्टोऽपि जीवति ॥ ५ ॥
श्लेष्मणः कर्णगूथस्य वामानामिकया कृतः ।
लेपो हन्याद्विषं घोरं नृमूत्रासेचनं तथा ॥ ६ ॥
शिरीषपुष्पस्वरसे भावितं श्वेतसर्षपम् ।
सप्ताहं सर्पदष्टानां नस्यपानाञ्जने हितम् ॥ ७ ॥

द्विपलं नतकुष्ठाभ्यां घृतक्षौद्रं चतुष्पलम् ।
अपि तक्षकदष्टानां पानमेतत्सुखप्रदम् ॥ ८ ॥
वन्ध्याकर्कोटजं मूलं छागमूत्रेण भावितम् ।
नस्यं काञ्जिकसंयुक्तं विषोपहतचेतसः ॥ ९ ॥

सांपके काटे हुएको गृहधूम, हल्दी, दारुहल्दी, व समूल चौराईके कल्कमें घी व दही मिलाकर पिलाना चाहिये । तथा परवलकी जड़के चूर्णके नस्यसे काले सांपसे काटा भी जी जाता है । तथा मुखके कफ अथवा कानके मैलको वाम हाथकी अनामिका अंगुलीसे लेकर दंशपर लेप करने तथा मनुष्य मूत्रका सिञ्चन करनेसे सर्पविष नष्ट होता है। तथा सिरसाके फूलोंके स्वरसमें भावित सफेद सरसोंका चूर्ण कर पान, नस्य व अञ्जनके लिये सांपके काटे हुए मनुष्योंको ७ दिनतक प्रयोग करना चाहिये । तथा तगर व कूठका मिलित चूर्ण ८ तो० और शहद व घी मिलित १६ तोला मिलाकर पीनेसे तक्षकसे काटा हुआ भी सुखी होता है । तथा बांझखेखसाकी जड़ बकरेके मूत्रमें भावित कर कांजीमें मिलाकर विषसे बेहोश मनुष्यको नस्य देना चाहिये ॥ ५-९ ॥

महागदः

त्रिवृद्विशाले मधुकं हरिद्रे
मञ्जिष्ठवर्गौ लवणं च सर्वम् ।
कटुत्रिकं चैव विचूर्णितानि
शृङ्गे निदध्यान्मधुना युतानि ॥ १० ॥
एषोऽगदो हन्त्युपयुज्यमानः
पानाञ्जनाभ्यञ्जननस्ययोगैः ।
अवार्यवीर्यो विषवेगहन्ता
महागदो नाम महाप्रभावः ॥ ११ ॥

निसोथ, इन्द्रायण, मौरेठी, हल्दी, दारुहल्दी, मञ्जिष्ठादिगणकी ओषधियां, समस्त नमक व त्रिकटु सब महीन पीस कपड़छान कर शहद मिलाकर सीङ्गकी शीशीमें धरना, चाहिये। यह पीने, अञ्जन, नस्य तथा मालिशसे विषके वेगको नष्ट करता है। इसका प्रभाव अनिवार्य होता है । यह महाप्रभावशाली "महागद" नामसे कहा जाता है ॥ १० ॥ ११ ॥

विविधावस्थायां विविधा योगाः

पीते विषे स्याद्वमनं च त्वक्स्थे ।
प्रदेहसेकादि सुशीतलं च ॥ १२ ॥
कपित्थमामं ससिताक्षौद्रं कण्ठगते विषे ।
लिह्यादामाशयगते ताभ्यां चूर्णपलं नतात् ॥ १३ ॥
विषे पक्वाशयगते पिप्पलीरजनीद्वयम् ।
मञ्जिष्ठां च समं पिष्ट्वा गोपित्तेन नरः पिबेत् ॥ १४

---

१ काटनेवाले सांपको ही काट खाना या मुलायम फल या मिट्टीका ढेला या कंकड आदिको दांतोंसे काटकर फेंकना सुश्रुतमें भी हितकर बताया है ।

रजनीसैन्धवक्षौद्रसंयुक्तं घृतमुत्तमम् ।
पानं मूलविषार्तस्य दिग्धविद्धस्य चेष्यते ॥ १५ ॥

विष पी लेनेपर, वमन तथा त्वचामें लग जानेपर शीतल लेप या सेक करना चाहिये । तथा कण्ठतक पहुँचे विषमें कच्चे, कैथेके गूधेको मिश्री व शहदके साथ मिलाकर चटाना चाहिये। तथा आमाशयगत विषमें तगरका चूर्ण ४ तो० शहद व मिश्री मिलाकर चटाना चाहिये । तथा पक्वाशयगत विषमें छोटी पीपल, हल्दी, दारुहल्दी, व मजीठ, समान भाग ले गोपितमें पीसकर पीना चाहिये । तथा जो मूलविषसे पीड़ित है, अथवा जो विष लिप्तशस्त्रसे विंध गया है, उसे हल्दी व सेंधानमकका चूर्ण शहद व उत्तम घी मिलाकर पिलाना चाहिये ॥ १२-१५ ॥

संयोगजविषचिकित्सा

सितामधुयुतं चूर्णं ताम्रस्य कनकस्य वा ।
लेहः प्रशमयत्युग्रं सर्वं संयोगजं विषम् ॥ १६ ॥
अङ्कोटमूलनिष्क्वाथफाणितं सघृतं लिहेत् ।
तैलाक्तः स्विन्नसर्वांगो गरदोषविषापहः ॥ १७ ॥

ताम्र अथवा सोनेकी भस्मको मिश्री व शहद मिलाकर चाटनेसे समस्त संयोगज विष नष्ट होते हैं । तथा अंकोहरकी जड़के क्वाथको गाढ़ा कर घी मिला चाटने तथा तैलकी मालिश कर समस्त शरीरके स्वेदन करनेसे गरदोष और विष नष्ट होते हैं ॥ १६ ॥ १७ ॥

कीटादिविषचिकित्सा

कटभ्यर्जुनशैरीयशेलुक्षीरिद्रुमत्वचः ।
कषायचूर्णकल्काः स्युः कीटलूताव्रणापहाः ॥१८॥

मालकांगनी, अर्जुन, कटसैला, लसोढा और दूधवाले वृक्षोंकी छालका कषाय अथवा चूर्ण अथवा कल्कमेंसे किसी एकका सेवन करनेसे कीड़े, मकडी आदिके व्रण शान्त होते हैं ॥ १८ ॥

मूषकविषचिकित्सा

आगारधूममञ्जिष्ठारजनीलवणोत्तमैः ।
लेपो जयत्याखुविषं कर्णिकायाश्च पातनम् ॥१९॥

गृहधूम, मजीठ, हल्दी, और सेंधानमकको पीसकर लगाया गया लेप कर्णिका (गांठ) को गिराता तथा मूषकविषको शान्त करता है ॥ १९ ॥

वृश्चिकचिकित्सा

यः कासमर्दपत्रं वदने प्रक्षिप्य कर्णफूत्कारम् ।
मनुजो ददाति शीघ्रं जयति विषं वृश्चिकानां सः२०
दंशे भ्रामणविधिना वृश्चिकविषहृत्कुठेरपादगुडिका
पुरधूपपूर्वमर्कच्छदमिव पिष्ट्वा कृतो लेपः ॥ २१ ॥
जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः ।
सुखोष्णो वृश्चिकार्तानां सुलेपो वेदनापहः ॥२२॥
अमलाघर्षणं दंशे कण्टकं च तदुद्धरेत् ।
करणे विषजे लेपात्फणिज्जकरसोऽथवा ॥ २३ ॥

जो कसौंदीके पत्तोंको मुखमें चबाकर कानमें फूँकता है, वह बिच्छूके विषको शीघ्रही नष्ट करता है । तथा बिच्छूके दंशके ऊपर तुलसीके जड़की गोली घुमानेसे बिच्छूका विष शीघ्रही उतर जाता है। ऐसे ही गुग्गुलुकी धूप देकर आकके पत्तोंका लेप लाभ करता है तथा जीरेके कल्कमें घी व सेंधानमक मिला गरम कर दंशपर गुनगुना लेप करनेसे वृश्चिक-विषकी पीड़ा शान्त होती है। ऐसे ही दंशके कांटेको निकाल-कर निर्मलीका घिसना लाभ करता है। अथवा मरुवाके रसका दंशके ऊपर लेप करनेसे लाभ होता है ॥ २२-२३ ॥

गोधादिविषचिकित्सा

कुङ्कुमकुनटीकर्कटपलहरितालैः
कुसुम्भसंमिलितैः ।
कृतगुडिकाभ्रामणतो
विदष्टगोधासरटविषजित् ॥ २४ ॥

केशर, मनशिल, केकड़ेके मांस, हरिताल तथा कुसुम्भके फूल मिलाकर बनायी गयी गोली दंशपर फेरनेसे गोह या गिरगिटका विष नष्ट होता है ॥ २४ ॥

मीनादिविषचिकित्सा

अंकोटपत्रधूमो मीनविषं झटिति विघटयेच्छृङ्गी ।
गोधावरटीविषमिव लेपेन कुटजकपालिजटा२५॥

अंकोहरके पत्तोंका धुआं, शीघ्रही मीनविषको नष्ट करता है । तथा काकड़ाशिङ्गीका लेप भी यही गुण करता है । जैसे कि कुरैयाकी छाल और नरियलकी जटासे गोह और बर्रका विष नष्ट होता है ॥ २५ ॥

श्वविषचिकित्सा

कनकोदुंबरफलमिव तण्डुलजलपिष्टं पीतमपहरति ।
कनकदलद्रवघृतगुडदुग्धपलैकं शुनां गरलम् ॥२६॥

धतूरा और गूलरके फल चावलके जलमें पीसकर पीनेसे या धतूरेके पत्तोंका रस घी, गुड़ व दूध मिलाकर ४ तोला पीनेसे कुत्तेका जहर मिट जाता है ॥ २६ ॥

भेकविषचिकित्सा

लेप इव भेकगरलं शिरीषबीजैः स्नुहीपयःसिक्तैः ।
हरति गरलं त्र्यहमशितांकोटजटाकुष्ठसम्मिलिता॥

सिरसाके बीज, सेहुण्डके दूधके साथ अथवा काले अंकोहरकी जड़ और कूठका ३ दिन लेप करनेसे मण्डूकविष नष्ट होता है ॥ २७ ॥

लालाविषचिकित्सा

मरीचमहौषधवालकनागाह्वैर्मक्षिकाविषे लेपः ।
लालाविषमपनयतो मूले मिलिते पटोलनीलिकयोः

काली मिर्च, सोंठ, सुगन्धवाला तथा नागकेशरको पीसकर बनाया गया लेप मक्खियोंके विषको तथा परवल और नीलकी जडका लेप लालाविषको नष्ट करता है ॥२८॥

नखदंतविषे लेपः

सोमवल्कोऽश्वकर्णश्च गोजिह्वा हंसपाद्यपि ।
रजन्यो गैरिकं लेपो नखदन्तविषापहः ॥ २९ ॥

सफेद कत्था, राल गाउजुवां, हंसराज, हल्दी, दारुहल्दी, और गेरूका लेप नख और दन्तविषको नष्ट करता है ॥ २९ ॥

कीटविषचिकित्सा

वचा हिङ्गु विडङ्गानि सैन्धवं गजपिप्पली ।
पाठा अतिविषा व्योषं काश्यपेन विनिर्मितम्॥३०
दशाङ्गमगदं पीत्वा सर्वकीटविषं जयेत् ।
कीटदष्टक्रियाः सर्वाः समानाः स्युर्जलौकसाम् ॥

बच, हींग, वायविडङ्ग, सेंधानमक, गजपीपल, पाढ अतीस, व त्रिकटु इन दश चीजोंका लेप "दशांग अगद् कहा जाता है । यह समस्त कीटविषोंको नष्ट करता है । इसी प्रकार जोकोंके विषमें भी समस्त कीटविषनाशक चिकित्सा करनी चाहिये ॥ ३० ॥ ३१ ॥

मृतसञ्जीवनोऽगदः

स्पृक्काप्लवस्थौणेयकांक्षीशैलेयरोचनातगरम् ।
ध्यामकं कुङ्कुमं मांसी सुरसात्रिफलैलकुष्ठग्रम् ॥
बृहतीशिरीषपुष्पश्रीवेष्टकपद्मचारटिविशालाः ।
सुरदारुपद्मकेशरशावरकमनः शिलाकौन्त्यः३३॥
जात्यर्कपुष्पसर्षपरजनीद्वयहिङ्गुपिप्पलीद्राक्षाः
जलमुद्गपर्णीमधूकदमनकमथ सिन्धुवाराश्च ३४॥
सम्पाकलोध्रमयूरकगन्धफलीलाङ्गलीविडंगाः ।
पुष्ये समुद्धृत्य समं पिष्ट्वा गुडिका विधेयाःस्यु ॥
सर्वविषघ्नो जयकृद्विषमृतसञ्जीवनो ज्वरनिहन्ता ।
पेयविलेपनधारणधूम्रग्रहणैर्गृहस्थश्च ॥ ३६ ॥

भूतविषजन्तुवलक्ष्मीकार्मणमन्त्राग्निमशन्यरीन्हन्यात्
दुःस्वप्नस्त्रीदोषानकालमरणाम्बुचौरभयम् ॥३७॥
धनधान्यकार्यसिद्धिश्रीपुष्टिवर्णायुर्वर्धनो धन्यः
मृतसञ्जीवन एष प्रागमृताद् ब्रह्मणाभिहितः ३८॥

मालतीके फूल, केवटी गोथा, गठौना, फिटकरी, छरीला गोरोचन, तगर, रोहिष, केशर, जटामांसी, तुलसी, त्रिफला छोटी इलायची, कत्था, बड़ी कटेरी, सिरसाके फूल, गन्धाबिरोजा, कमल, भुइआमला, इन्द्रायण, देवदारु, कमलका केशर, शावरलोध, मनशिल, सम्भालूके बीज चमेलीके फूल आकके फूल, सरसों, हल्दी, दारुहल्दी, हींग, छोटी पीपल मुनक्का, सुगन्धवाला, मुद्गपर्णी, मौरैठी, देवना, सम्भालू, अमलतास, लोध, अपामार्ग, प्रियंगु, कलिहारी व वायविडङ्ग समस्त द्रव्य समान भाग ले कूट पीसकर पुष्य नक्षत्रमें गोली बनानी चाहिये । यह समस्त विषोंको नष्ठ करता, विषसे मरते हुएको बचाता तथा ज्वर नष्ट करता है । यह पीने, लेप करने, धारण करने, धूम पीने तथा घरमें रंगनेसे भी लाभ करता है । तथा भूत, विष, क्रिमि, दरिद्रता, मन्त्र प्रयोग, अग्नि वज्र और शत्रुओंके भय, दुःस्वप्न, स्त्रीदोष, अकाल मृत्यु, जल तथा चोरभयको दूर करता है । यह "मृत सञ्जीवन" धन, धान्य, कार्यसिद्धि, लक्ष्मी, पुष्टि, वर्ण और आयुको अधिक बढाता,अतः धन्य है । इसे श्रीब्रह्माजीने अमृतके पहले कहा है ॥ ३२–३८ ॥

इति विषाधिकारः समाप्तः ।

अथ रसायनाधिकारः

सामान्यव्यवस्था

यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम् ।
पूर्वे वयसि मध्ये वा शुद्धदेहः समाचरेत् ॥ १ ॥
नाविशुद्धशरीरस्य युक्तो रासायनो विधिः ॥१॥
नाभाति वाससि क्लिष्टे रङ्गयोग इवार्पितः ॥ २ ॥

जो औषधवृद्धावस्था व रोगको नष्ट करती है, उसे"रसायन" कहते हैं । उसका प्रयोग बाल्यावस्था व युवावस्थामें शुद्ध शरीर (वमनादिसे) होकर करना चाहिये, शरीरकी शुद्धि विना रसायनप्रयोग लाभ नहीं करता, जिस प्रकार मैले कपड़ेपर रंग नहीं चढ़ता ॥ १ ॥ २ ॥

पथ्यारसायनम्

गुडेन मधुना शुण्ठ्या कणया लवणेन वा ।
द्वे द्वे खादन्सदा पथ्ये जीवेद्वर्षशतं सुखी ॥ ३ ॥

गुड़, शहद, सोंठ, छोटी पीपल, व नमक इनमेंसे किसी एक के साथ प्रतिदिन २ छोटी हर्र खानेसे १०० वर्षतक नीरोग रहकर १०० वर्षतक मनुष्य जीता है ॥ ३ ॥

अभयाप्रयोगः

सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात् ।
वर्षादिष्वभया सेव्या रसायनगुणैषिणा ॥ ४ ॥

रसायनकी इच्छा रखनेवालेको बडी हर्रका सेवन वर्षाकालमें सेंधानमकके साथ, शरदऋतुमें शक्करके साथ, हेमन्तमें सोंठके साथ, शिशिरमें पिप्पलीके साथ और वसन्तमें शहदके तथा ग्रीष्ममें गुड़के साथ करना चाहिये ॥ ४ ॥

लोहत्रिफलायोगः

त्रैफलेनायसीं पात्रीं कल्केनालेपयेन्नवाम् ।
तमहोरात्रिकं लेपं पिबेत्क्षौद्रोदकाप्लुतम् ॥ ५ ॥
प्रभूतस्नेहमशनं जीर्णे तस्मिन्प्रयोजयेत् ।
अजरोऽरुक्समाभ्यासाज्जीवेच्चापि समाःशतम् ॥६

त्रिफलाके कल्कका लेप नवीन लोहेके पात्रमें करना चाहिये फिर रातदिन रहा हुआ वह लेप शहद और जल मिलाकर पीना चाहिये । इसके हजम हो जानेपर अधिक स्नेह मिला भोजन करना चाहिये । इस प्रकार एक वर्षके प्रयोग कर लेनेसे मनुष्य जवान तथा नीरोग रह कर १०० वर्षतक जीता हैं ॥ ५ ॥ ६ ॥

पिप्पलीरसायनम्

पञ्चाष्टौ सप्त दश वा पिप्पलीः क्षौद्रसर्पिषा ।
रसायनगुणान्वेषी समामेकां प्रयोजयेत् ॥ ७ ॥
तिस्रस्तिस्रस्तु पूर्वाह्ने भुक्त्वाग्रे भोजनस्य च ।
पिप्पल्यः किंशुकक्षार भाविता घृतभर्जिताः ॥८॥
प्रयोज्या मधुसंमिश्रा रसायनगुणैषिणा ।
जेतुं कासं क्षयं श्वासं शोषं हिक्कां गलामयम् ९॥
अर्शांसि ग्रहणीदोषं पाण्डुतां विषमज्वरम् ।
वैस्वर्यं पीनसं शोफं गुल्मं वातबलासकम् ॥१०॥

रसायनके गुणोंकी इच्छा रखनेवालेको पीपल ५, ७, ८, १०, (अपनी प्रकृतिके अनुसार) प्रतिदिन शहद व घीके साथ सेवन करना चाहिये । यह प्रयोग एक वर्षका है । अथवा ढाकके क्षार जलसे भावित तथा घीमें भूनी गयी । छोटी पीपल तीन तीनकी मात्रासे शहदमें मिलाकर प्रातः-काल, भोजनसे पहिले व भोजनके अनन्तर खानेसे कास, क्षय श्वास, शोष, हिक्का, गलरोग, अर्श, ग्रहणीदोष, पाण्डुरोग-विषमज्वर, स्वरभेद, पीनस, गुल्म व वातबलासक, नष्ट होते हैं ॥ ७-१० ॥

त्रिफलारसायनम्

जरणान्तेऽभयामेकां प्राग्भक्तं द्वे विभीतके ।
भुक्त्वा तु मधुसर्पिर्भ्यां चत्वार्यामलकानि च११॥
प्रयोजयेत्समामेकां त्रिफलाया रसायनम् ।
जीवेद्वर्षशतं पूर्णमजरोऽव्याधिरेव च ॥ १२ ॥

अन्न हजम हो जानेपर १ हर्र, भोजनके पहिले दो बहेड़े और भोजनके बाद ४ आंवलेका घी व शहदके साथ १ वर्ष तक प्रयोग करनेसे मनुष्य युवा तथा नीरोग रहकर १०० वर्ष तक जीता है ॥ ११ ॥ १२ ॥

विविधानि रसायनानि

मण्डूकपर्ण्याः स्वरसः प्रयोज्यः
क्षीरेण यष्टीमधुकस्य चूर्णम् ।
रसो गुडूच्यास्तु समूलपुष्प्याः
कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः ॥१३॥
आयुःप्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्धनानि ।
मेध्यानि चैतानि रसायनानि
मेध्या विशेषेण तु शङ्खपुष्पी ॥ १४ ॥

मण्डूकपर्णीका स्वरस अथवा दूधके साथ मौरेठीका चूर्ण अथवा गुर्चका रस, अथवा मूल व पुष्पसहित शंखपुष्पीका रस इनमेंसे किसी एकका प्रयोग करना चाहिये । यह आयु बढानेवाले, रोग नष्ट करनेवाले, बल, अग्नि तथा वर्ण और स्वरको बढानेवाले तथा मेधाके लिये हितकर रसायन हैं।इनमें भी शंखपुष्पी विशेष कर मेधाके लिये हितकर है ॥१३॥१४॥

अश्वगन्धारसायनम्

पीताश्वगन्धा पयसार्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
कृशस्य पुष्टिं वपुषो विधत्ते
बालस्य शस्यस्य यथाम्बुवृष्टिः ॥ १५ ॥

असगन्धके चूर्णका दूधके साथ अथवा घृत, तैल या गुनगुने जलमेंसे किसी एकके साथ सेवन करनेसे दुर्बलके शरीरको इस प्रकार पुष्ट करता है, जैसे जलवृष्टि छोटे धानोंको ॥ १५ ॥

धात्रीतिलरसायनम्

धात्रीतिलान्भृङ्गरजोविमिश्रान्
ये भक्षयेयुर्मनुजाः क्रमेण ।
ते कृष्णकेशा विमलेन्द्रियाश्च
निर्व्याधयो वर्षशतं भवेयुः ॥ १६ ॥

जो मनुष्य आंवला, तिल व भांगराके चूर्णका सेवन करते हैं, वे कालेकेशयुक्त इन्द्रियशक्तिसम्पन्न १०० वर्ष तक जीते हैं ॥ १६ ॥

वृद्धदारकरसायनम्

वृद्धदारकमूलानि श्लक्ष्णचूर्णानि कारयेत् ।
शतावर्या रसेनैव सप्तरात्राणि भावयेत् ॥ १७ ॥
अक्षमात्रं तु तच्चूर्णं सर्पिषा सह भोजयेत् ।
मासमात्रोपयोगेन मतिमाञ्जायते नरः ॥ १८ ॥
मेधावी स्मृतिमांश्चैव वलीपलितवर्जितः ।

विधाराकी जड़का महीन चूर्ण कर शतावरीकेरसकी ७ भावना देनी चाहिये । यह चूर्ण १ तोलाकी मात्रासे प्रतिदिन घीके साथ खाना चाहिये । इसके सेवनसे मनुष्य बुद्धिमान्, मेधावी, स्मृतिमान् तथा वलीपलितरहित होता है ॥ १७ ॥ १८ ॥

हस्तिकर्णचूर्णरसायनम्

हस्तिकर्णरजः खादेत्प्रातरुत्थाय सर्पिषा ॥ १९ ॥
यथेष्टाहारचारोऽपि सहस्रायुर्भवेन्नरः ।
मेधावी बलवान्कामी स्त्रीशतानि व्रजत्यसौ ॥२०॥
मधुना त्वश्ववेगः स्याद्बलिष्ठः स्त्रीसहस्रगः ।
मन्त्रश्चायं प्रयोक्तव्यो भिषजा चाभिमन्त्रणे ॥२१॥
" ओं नमो महाविनायकाय अमृतं रक्ष रक्ष मम फलसिद्धिं देहि रुद्रवचनेन स्वाहा " ॥ २२ ॥

जो मनुष्य प्रातःकाल भूपलाशके चूर्णको घीके साथ चाटता है, तथा यथेष्ट आहार विहार करता है, वह १००० वर्षतक जीता है । तथा मेधावी, बलवान् व कामी होकर १०० स्त्रियोंके साथ मैथुन करता है । तथा इसीको शहदके साथ चाटनेसे हजारों स्त्रियोंको गमन करनेकी शक्ति हो जाती है । तथा इस मन्त्रसे अभिमन्त्रण करना चाहिये । " ओं नमो महाविनायकाय अमृतं रक्ष रक्ष मम फलसिद्धिं देहि रुद्रवचनेन स्वाहा " ॥ १९-२२ ॥

धात्रीचूर्णरसायनम्

धात्रीचूर्णाढकं स्वस्वरसपरिगतं क्षौद्रसर्पिः समांशं
कृष्णामानीसिताष्टप्रसृतयुतमिदं स्थापितं भस्मराशौ ।
वर्षान्ते तत्समश्नन्भवति विपलितो रूपवर्णप्रभावै
र्निर्व्याधिर्बुद्धिमेधास्मृतिबलवचनस्थैर्यसत्त्वैरुपेतः २३

आंवलेका चूर्ण ३ सेर १६ तोला, आंवलेके स्वरससे ही ७ बार भावित कर शहद व घी समान भाग मिला तथा छोटी पीपल ३२ तोला, मिश्री ६४ तोला मिलाकर भस्मराशिमें गाड़ देना चाहिये । वर्षाकालके अनन्तर निकाल कर इसका सेवन करनेसे मनुष्य पलितरहित रूप, वर्ण और प्रभावयुक्त नीरोग तथा बुद्धि,धारण शक्ति, स्मरणशक्ति, बल व वचनकी स्थिरता तथा सत्वगुणसे युक्त होता है ॥ २३ ॥

गुडूच्यादिलेहः

गुडूच्यपामार्गविडङ्गशंखिनी
वचाभयाकुष्ठशतावरी समा ।
घृतेन लीढा प्रकरोति मानवं
त्रिभिर्दिनैः श्लोकसहस्रधारिणम् ॥ २४ ॥

गुर्च, अपामार्ग, वायविडङ्ग, शंखपुष्पी, वच, हर्र, कूठ और शतावरी समान भाग ले चूर्ण कर घीके साथ चाटनेसे ३ दिनके ही प्रयोगसे मनुष्य हजारों श्लोक कण्ठ करनेकी शक्तिसे सम्पन्न होता है ॥ २४ ॥

सारस्वतघृतम्

समूलपत्रामादाय ब्राह्मीं प्रक्षाल्य वारिणा ।
उलूखले क्षोदयित्वा रसं वस्त्रेण गालयेत् ॥ २५ ॥
रसे चतुर्गुणे तस्मिन्घृतप्रस्थं विपाचयेत् ।
औषधानि तु पेष्याणि तानीमानि प्रदापयेत् ॥२६॥
हरिद्रा मालती कुष्ठं त्रिवृता सहरीतकी ।
एतेषां पलिकान्भागाञ्शेषाणि कार्षिकाणि तु॥२७॥
पिप्पल्योऽथ विडङ्गानि सैन्धवं शर्करा वचा ।
सर्वमेतत्समालोड्य शनैर्मृद्वग्निना पचेत् ॥ २८ ॥
एतत्प्राशितमात्रेण वाग्विशुद्धिश्च जायते ।
सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥ २९ ॥
अर्धमासप्रयोगेण सोमराजीवपुर्भवेत् ।
मासमात्रप्रयोगेण श्रुतमात्रं तु धारयेत् ॥ ३० ॥
हन्त्यष्टादश कुष्ठानि अर्शांसि विविधानि च ।
पञ्च गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत् ॥३१॥
वन्ध्यानां चैव नारीणां नराणां चाल्परेतसाम् ।
घृतं सारस्वतं नाम बलवर्णाग्निवर्धनम् ॥ ३२ ॥

मूलपत्रसहित ब्राह्मी खोद जलसे धो ओखलीमें कूटकर कपड़ेसे रस छानना चाहिये । इस प्रकार छने ६ सेर ३२ तो० रसमें १ सेर ९ छ. ३ तो०घी मिलाकर पकाना चाहिये । तथा हल्दी, मालती, कूठ, निसोथ व हर्र, प्रत्येक ४ तोले तथा छोटी पीपल, वायबिड़ंग, सेंधानमक,शक्कर व बच प्रत्येक १ तोलाका कल्क मिलाकर मन्द आँचसे पकाना चाहिये। सम्यक् पाकार्थ घीसे चौगुना जल भी छोड़ना चाहिये । यह घृत चाटनेसे ही वाणी शुद्ध करता है, इसका प्रयोग करनेवाला ७ दिनमें ही किन्नरोंके समान गानेवाला, १५ दिनमें चन्द्रमाकी किरणोंके समान शरीरवाला होता है । एक मास प्रयोग कर लेनेसे जो कुछ सुनता है, उसे ही कण्ठ कर लेता है । यह अठारह प्रकारके कुष्ठ, अर्श,पांचों गुल्म प्रमेह तथा पांचों प्रकारके कास नष्ट करता है । वन्ध्या स्त्रियों तथा अल्पवीर्यान्वित पुरुषोंके लिये हितकर है।तथा "यह सारस्वत घृत"बल वर्ण व अग्निको बढाता है ॥२५-३२॥

जलरसायनम्

कासश्वासतिसारज्वरपिडककटीकुष्ठकोठप्रकारान् ।
मूत्राघातोदरार्शःश्वयथुगलशिरःकर्णशूलाक्षिरोगान् ।
ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जन्तो-
स्तांस्तानभ्यासयोगादपनयति पयः पीतमन्ते निशायाः
व्यङ्गवलीपलितघ्नं पीनसवैस्वर्यकासशोथघ्नम् ।
रजनीक्षयेऽम्बुनस्यं रसायनं दृष्टिजननं च ॥ ३४ ॥

